अथ नवमः पटलः।

अथ प्रतिष्ठास्नपनाद्यनन्तरं समाचरेत् सर्वसुपर्वसूत्सवम्।
ततोऽनुसंवत्सरमुक्तवासरव्यस्थया चाखिलसम्पदाप्तये।। १।।

विमर्शिनी

एवमष्टभिः पटलैः भूपरिग्रहादिस्नपनपर्यन्तं कर्माभिधाय नवमेन पटलेनोत्सवं वक्तुमारभते—अथेति। अथशब्दार्थमेव विवृणोति—प्रतिष्ठास्नपनाद्यनन्तरमिति। प्रतिष्ठास्नपनं प्रतिष्ठायाश्चतुर्थदिवसस्नपनम्। आदिशब्देन जीर्णोद्धारादिकमुच्यते। प्रातिष्ठादीनां स्नपनानन्तरं सर्वसुपर्वसु सप्तस्वपि देवेषूत्सवमाचरेत्। तत आरभ्य अनुसंवत्सरं संवत्सरे संवत्सरे च उक्तवासरव्यवस्थया आगमेषूक्तसप्ताह्निकादिदिवस-व्यवस्थायोगेन अखिलसम्पदाप्तये सर्वसम्पत्समापादनाय च।। १ ।।

विवरणम्

अथेदानीं वरणविधौ क्रियतां विष्णुयागो मे शिवयागस्तीर्थस्नानावसानिकः[१] स्कन्दयाग[२] इति चा[३]र्थनीयतयोक्तं[४] प्रतिष्ठाशेषञ्चातुर्थिकस्नपनानन्तरम्प्राप्तं उत्सवं वक्तुमुपक्रमते—अथ प्रतिष्ठास्नपनाद्यनन्तरमिति। प्रतिष्ठास्नपनं चातुर्थिकस्नपनमा-

---

१.'कं' ख. छ. पाठः। २.'गस्तीर्थस्नानावसानिकं स्कन्दयाग इति' ख पाठः। ३.'या' ख पाठः। ४.'क्त'क पाठः।

Shripuram Publications
www.shripuram.org

दिशब्देन दिशाहोममहाबलिपीठ[1]स्नपनादेस्तुर्यदिनात्यये यदि महापीठप्रतिष्ठापनमित्याद्युक्तकालविलम्बसम्भवे तदीयावस्रावप्रोक्षणानन्तरमेवेत्युक्तम्। यद्वा प्रायश्चित्तजीर्णोद्धारादिस्नपनानामादिशब्देन ग्रहणम्। यदुक्तंस्नपनञ्चाथ कुर्यादुत्सवसंयुतमिति। सर्वसुपर्वस्विति। सुपर्वाणो विष्णुशिवादिदेवताः। ततोऽनुसंवत्सरमिति। प्रथमोत्सवे कृते च प्रतिसंवत्सरं प्रतिदिनं नित्यपूजावन्नित्योत्सवतयेति भावः। उक्तवासरव्यवस्थयेति। आगमोक्तदिवसनियमेन। चकारः उत्सवं समाचरेदित्येतनुकर्षणार्थः। अखिलसम्पदाप्तय इति। प्रतिष्ठया तावद्याभ्युदयसिद्धिरीप्सिता सा तच्छेषभूत उत्सवेऽपि कृत एव कृत्स्ना परिपूर्णा प्राप्यत इति भावः। यद्वाखिलसम्पदाप्तये चेति सम्बन्धः। काम्योत्सवोऽप्येवमिह गृहीतो भवति। तदुक्तं "देवसन्निधये चात्र मङ्गलायाघशान्तये"।।१।।

मार्गादिराधावधिकेषु षट्सु मासेष्विहैकत्र परत्र वातः।
स्वर्क्षान्तमाकल्प्य समुप्तबीजः सप्ताह्निकाद्युत्सवमादधीत।।२।।

विमर्शिनी

उत्सवस्य कालनियममाह—मार्गादीति। मार्गादिराधावधिकेषु मार्गशीर्षादिवैशाखान्तेषु इह षड्सु मासेषु मध्ये एकत्र मासे अतः परत्र वा मासे स्वर्क्षान्तं मार्गशीर्षादितत्तन्मासविशिष्टनक्षत्रान्तम्, अथवा स्वर्क्षान्तं विष्ण्वादिदेवेषु स्वस्वपञ्चमीदिनान्तं, यद्वा स्वस्वप्रतिष्ठानक्षत्रान्तं तस्मिन्नृक्षे तीर्थस्नानं यथा भवति तथा चाकल्प्य तत्पूर्वमेव यथाकालं समुप्तबीजः कृतमङ्गलबीजावापो भूत्वा सप्ताह्निकाद्युत्सवं यथोक्तमादधीत।।२।।

विवरणम्

उत्सवं कारयेच्छक्त्येत्यादिकस्तावदागमोक्तो वासर इत्यत्राह—मार्गादिराधावधिकेष्विति। अत्र मार्ग[2]मासो मार्गशीर्षः[3] राधश्च वैशाखः। मासेष्वेकत्रेति। एषामन्यतम इत्यर्थः। अतः परत्रवेति। मार्गाद्युक्तेभ्योऽन्यस्मिन्वा श्रावणकार्त्तिकादौ मासे। स्वर्क्षान्तमिति। तत्तद्देवस्य नक्षत्रं मृगशिरो विशाखादितत्तन्मासनक्षत्रं वाभिप्रेतम्। [4]तदुक्तं-'आर्द्रावसानं सङ्कल्प्य सप्ताहं प्रतिवत्सरम्। नियतं सर्वमासेषु मार्गशीर्षे विशेषतः।।' इति। शिवविषयमेतत्। "श्रवणा[5]न्तं तु सङ्कल्प्य तीर्थस्नानावसानिकम्"। इति विष्णुविषयः। एवं दुर्गादिष्वपि। तथा—

---

१. 'ठप्रतिष्ठाय' ख. च. छ पाठः। २. 'र्गो' ख. च पाठः। ३. 'र्षं' क. च पाठः। ४. 'य' च पाठः। ५. 'न्तस्तु' क पाठः।

Shripuram Publications www.shripuram.org

उत्सवं कारयेत् पौषे पुष्यान्तं विजयाय तु।
पितृप्रमोदनम्माघे मघान्तं फाल्गुने तथा।।

इत्यादि। समुप्तबीज इति। तदङ्गतया प्रथमतस्तृतीयपटलारम्भोक्तरीत्या मङ्गलाङ्कुरारोपणमुक्तम्। सप्ताह्निकाद्यमिति मित्राङ्कसंख्ये दिने शैलेषुप्रमितेऽपि वेति[1] तत्रोक्तं[2]विधिवदिति भावः।। २।।

स्नाताचान्तः[3] स्फीतभेर्यादिनादो
गर्भागारं प्राप्य नान्दीमुखान्ते।
कृत्वा पुण्याहं समाराध्य देवं
मन्त्री सङ्कल्पं करोतूत्सवस्य।। ३।।

विमर्शिनी

तदारम्भविधिमाह—स्नाताचान्त इति। स्नाताचान्तः स्नानाचमनाद्यनन्तरं मन्त्री पाद्यपूजाकर्मज्ञः स्फीतभेर्यादिनादः भेरीसन्ताडनं यथोक्तं कारयित्वा गर्भागारं प्राप्य नान्तीमुखान्ते पुण्याहं कृत्वा देवं समाराध्य उत्सवस्य सङ्कल्पं करोतु, एतं कालमेवंभूतमुत्सवं करिष्य इति देवाय निवेदयेदित्यर्थः।।३।।

विवरणम्

विधानाभिप्रायं तदेव दर्शयति—स्नात्वेति। कर्माङ्गतया स्नानादिकमेतदुक्तम्। नान्दीमुखान्त इति। गणपतिं संपूज्य प्रायश्चित्तपूर्वकं नान्दीमुखं विधाय तदनन्तरमिति भावः। मन्त्रीति। प्रसन्नार्घ्यदानानन्तरमोंभगवंस्तवोत्सवंकरिष्यामीत्येवमिति भावः। सङ्कल्पश्चायं तदनुज्ञापनगर्भ इति बोद्धव्यम्। समुप्तबीज इत्यर्थादेव सङ्कल्पानन्तरं स्यादिति ज्ञेयम्।। ३।।

तत्राग्रतः स्थापयतु ध्वजं च
तद्दण्डवाहादिकमारचय्य।
संशोध्य सम्भूष्य च पल्लवाद्यैः
पुण्याहमाधाय यथाविधानम्।।४।।

---

१. 'ति हि त'। २. 'क्तं' ख. च पाठः। ३. 'त्वा' इति मूलकोशपाठः।

Shripuram Publications
www.shripuram.org

संशोध्य भूताप्ययधारणाद्यै-
स्तद्वाहनं वर्णतनुं विभाव्य।
देवाग्रसंस्थात् कृतमूर्तिकेऽस्मिन्
वाहाणुना वाहनतोऽभिवाह्य।।५।।

साकल्यमापाद्य समर्च्य केतौ
सम्यक् प्रतिष्ठाप्य समिष्टपीठे।
केतुं च संस्थाप्य समिष्टपीठे
गर्ते पताकादिपरिष्कृताङ्गम्।।६।।

आवाह्य सम्पूज्य निवेद्य वेद्यां
कृत्वा बलिं प्रार्थयतां च मन्त्री।
ध्वजप्रतिष्ठापनकर्म यत्र
तन्नित्यसान्निध्यकृते कृतं प्राक्।।७।।

तत्राधुना केतुपटेऽभिवाह्य
तद् वाहमारोप्य यजेद् यथोक्तम्।
कुर्याच्च केतून् वहिरग्निमादि-
दिक्पीठिकान्ते बलिदेवतानाम्।।८।।

विमर्शिनी

तत्राग्रतः पुरोभागे ध्वजं च स्थापयतु। अग्रत इत्यनेन केषाञ्चित् पक्षे प्रागेव ध्वजस्थापनाङ्गीकार उत्सवस्य सूचितः। तत्स्थापनविधानमाह—तद्दण्डवाहादिकमिति। ध्वजदण्डं वाहनं पताकां घण्टादिकं[1] चारचय्य कारयित्वा मन्त्री केतुस्थान उपविश्य केतुदण्डं दर्भमृदादिभिः संशोध्य पल्लवाद्यैः सम्भूष्य यथाविधानं मूर्तिपैः सह पुण्याहमाधाय तद्वाहनं भूताप्ययधारणाद्यैः भूतसंहारेण शोषणादिभिश्च संशोध्य वर्णतनुं लिपिप्राणायामादिभिर्लिपिमयदेहं विभाव्य पीठं प्रपूज्य कृतमूर्तिके कल्पितमूर्तिकेऽस्मिन् वाहने सति गर्भागारं गत्वा देवाग्रसंस्थाद् वाहनतो वाहाणुना वाहनमभिवाह्य साकल्यमापाद्य समर्च्य केतुस्थानं प्राप्य समिष्टपीठे केतौ सम्यग् अचञ्चलं प्रतिष्ठाप्य समिष्टपीठे गर्ते

१. 'ण्टां चा' क. पाठः।

Shripuram Publications
www.shripuram.org
www.shripuram.org

पताकादिपरिष्कृताङ्गं पताका[1]घण्टा-मालादिभिरलङ्कृतावयवं केतुं च संस्थाप्य आवाह्य सम्पूज्य निवेद्य वेद्यां तन्मूले वेदिकां कृत्वा बलिं च कृत्वा प्रार्थयतां च। मन्त्रीत्यनेन प्रार्थनामन्त्रज्ञ इति सूचितम्। यत्र तु देवालये तन्नित्यसान्निध्यकृते तस्या ध्वजदेवताया नित्यपूजाबल्यर्थं ध्वजप्रतिष्ठापनकर्म महाध्वजस्थापनं प्रागेव कृतं, तत्र त्वधुना उत्सवारम्भे केतुपटे पताकायां तद्वाहनं यथोक्तमावाह्यानन्तरं केतावारोप्य लम्बयित्वा यजेत् सम्पूज्य बलिं दद्यात्। ततो बहिरग्निमादिदिक्पीठिकान्ते बहिर्गतानाम् अग्रगतादीनां दिक्पीठिकानां समीपे कुमुदादीनां नन्द्यादीनां वान्येषां वा बलिदेवतानां स्वस्वमन्त्रेणाष्टौ केतून् कुर्याच्च।।४-८।।

विवरणम्

तत्राग्रतः स्थापयतु ध्वजञ्चेति। बीजवपनानन्तरमित्यर्थः। तत्प्रकारं विवृणोति तद्दण्डवाहादिकमिति। यद्यपि ध्वजप्रतिष्ठापनं प्रागु[2]क्तं किन्तु न तत्सर्वत्र सम्भवति सद्यो ध्वजस्थापनमेव सुलभमित्यभिप्रायेणैतदिहोच्यते। अत एव ध्वजप्रतिष्ठापनकर्म यत्रेत्यादि पश्चादभिधीयत इति। तद्दण्डवाहादि[3]कमिति पताकाघण्टा[4]ग्रहणम्। संशोध्येति। वाहनस्य दर्भमृत्त्वग्भिर्दण्डस्य क्षाळनेन च शोधनमुक्तम्। सम्भूष्य च पल्लवाद्यैरिति। अत्रार्थाद् ध्वजदण्डस्यैव भवति। "सूत्रेण दर्भदाम्ना च पश्चादश्वत्थपल्लवैः। समन्ताद्वेष्टयेन्मन्त्री" इति चोक्तम्। पुण्याहमाधाय यथाविधानमिति। ध्वजदेवतापरिग्रहपू[5]र्वकं चतुर्भिर्मूर्तिपैस्सह वाहनस्य पुण्याहं कृत्वेत्यर्थः। अत्र ध्वजदण्डस्तदायतनादुत्तरत उदग्रः प्राग्वा निवेशनीयः। वाहनञ्च तण्डुलपूर्णपात्रे पताकाद्यन्वितं निवेशनीयमिति ज्ञेयम्। पुण्याहशेषेण ध्वजदण्डः क्षाळनीयः।।४।।

वर्णतनुमिति। लिपिभावनाभिप्रायम्। पताकादेर्ध्वजदण्डस्यापि शोषणादिकं शक्त्यादिभिः ध्रुवेण च पूजनमपीष्यते। देवाग्रसंस्थाद्वाहनत इति। अत्र गर्भालयं समेत्येत्यादि यत् प्रागुक्तं तत्सर्वमनुसरणीयम्।। ५।।

केतौ सम्यगिति। दण्डाग्रे यद्वाहनास्पदं कृतं तत्र कूर्चं निधाय किञ्चित्पीठमिष्ट्वा प्रणवादिपूर्वकं वाहनं सम्यग् दृढतया स्थापयेत्। पताकादिकमपि शक्त्यादिभिस्त-दीयदण्डे सुदृढं लम्बयेत्। पताकादिपरिष्कृताङ्गमिति ह्यनूद्यते। पुनर्वाहनमावाह्य किञ्चित्सम्पूज्य रक्षां कुर्यात्। केतुञ्चेति। तत्खातगर्ते प्राक् पुण्याहशेषप्रोक्षिते

१. 'क' ख. घ. ङ. पाठः। २. 'क्तं न' क पाठः। ३. 'कपता'। ४. 'ण्डास्रग्' ख. च पाठः। ५. 'हान्वितं च' ख. च पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

कूर्चगन्धपुष्पाक्षतं निधाय किञ्चित्पीठमिष्ट्वा तत्र[1] तद्ध्वजं सुकुशलैर्नरैर्देवाभिमुखतया प्रतिष्ठापयेत्। पुनस्तन्मूले वेदिकायां कल्पितायां तद्ध्वजस्थापनधिया स्वयं स्पृष्ट्वा पुनर्वाहनमन्त्रेण तस्मिन्नावाह्य सम्पूज्य निवेद्य बलिञ्चोपहृत्य प्रसन्नपूजां कृत्वा प्रार्थयेत 'यावदयमुत्सवो वर्तते तावदत्रैव रक्षार्थं तिष्ठ सर्वदे'ति। पुनरवसानीयार्घ्यदानादिपूर्वकं रक्षां कुर्यादिति।। ६-७।।

तत्राधुनेति। ध्वजस्थापनकाले प्राप्ते इत्यर्थः। केतुपटे तद्वाहमभिवाह्येति। यथोक्तमिति सम्बन्धनीयम्। पूण्याहपूर्वकं पताकां धारणाभिः संस्कृत्य देवाग्रतो नीत्वा कृतमूर्तिकायां[2] तस्यां तद्वाहनतोऽभिवाह्य सम्पूज्य रज्ज्वा तां ध्वजदण्डाग्र आरोपयेत्। पुनश्च तस्यां तद्वाहने[3] चावाह्य सम्पूज्य निवेद्य बलिं दत्त्वा प्रसन्नपूजां कृत्वा प्रार्थयेत पूजां समाप्य रक्षामपि कुर्यादित्यभिप्रायः। बहिरग्रिमादिदिक्पीठिकान्तं इति। दीपशाला-तोऽपि बहिरष्टदिक्षु बलिपीठिका[4] सकलपीठिकास्थापनविधावेव कल्पनीया इत्यर्थाद्गम्यते। तासा[5]मित्यग्रिमाद्यष्टपीठिकानामन्ते बहिर्भाग एव सन्निधौ कुमुदनन्द्यादिप्रधानबलिदेवतानां केतून् पताकोज्ज्वलानष्टौ स्थापयेत्। तत्प्रयोगक्लृप्तिस्तु मण्डपसंस्कारोक्तवत् प्रतिपत्तव्या इति।। ८।।

प्राकारान्तः समन्ताद् रुचिरतरवितानादिभिर्भूषयित्वा
पूगस्तम्भादिशुम्भच्छिबिरविततिभिर्यन्त्रदीपादिभिश्च।
संमृ[6]ज्यालिप्य माल्यैर्बहलपरिमलैर्मण्डयित्वा विशोध्य
ग्रामे सर्वत्र संस्थापयतु शुभपताकोज्ज्वलान् केतुदण्डान्।। ९।।

विमर्शिनी

प्राकारान्तः बाह्यगतप्राकारान्तर्भागेऽपि समन्तात् चतुर्दिक्ष्वपि रुचिरतरवितानादिभिः अतिमनोहरैः वितानाच्छादनादिभिः पूगस्तम्भादिशुम्भच्छिबिरविततिभिः पूगस्तम्भादिभिः शोभमानैर्मण्डपविशेषैः यन्त्रदीपादिभिरन्यैश्चालङ्कारैर्भूषयित्वा भूप्रदेशं संमृज्यालिप्य बहलपरिमलैर्माल्यैः पुष्पविशेषैश्च मण्डयित्वालङ्कृत्य ग्रामेऽपि सर्वत्र विशोध्य शुभपताकोज्ज्वलान् केतुदण्डांश्च संस्थापयतु।। ९।।

---

१. 'त्र ध्व' क पाठः। २. 'यामस्यां' ख. च पाठः। ३. 'हेन चा' च पाठः। ४. 'कास्था' ख पाठः। ५. 'सामग्रि' ख पाठः। ६. 'माज्यालि' इति मूलकोशपाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

उत्सवालङ्कारान्दर्शयति——प्राकारान्तरिति[1]। सम्मार्ज्यालिप्येति। प्राकारान्तरीति सम्बध्यते। तदुक्तं——

"प्राकारान्तर्बहिश्चैव प्रथमम्मार्जनं भवेत्।
गोमयालेपनञ्चैव विधातव्यं निरन्तरम्।।
पुष्पैः सुगन्धैरुत्फुल्लैः प्राकारान्तर्भुवं शुभैः।
भूषयेत् पुष्पमालाश्च लम्बयेदभितो गृहम्।। "

इति। ग्रामे सर्वत्र विशोध्येत्यन्वयः। यदुक्तं——

"ग्रावीथीश्च सम्मार्ज्य प्रोक्ष्य गन्धोदकैस्ततः।
समन्ताद्विकिरेत्पुष्पैः शोभनैश्च सुगन्धिभिः।
ग्रामपर्यन्तदेशेषु ग्रामान्तश्चत्वरेषु च।
चैत्यारामेषु गोष्ठेषु देवतायतनेषु च।
तोरणैश्च पताकाभिर्मण्डलैश्चोपशोभयेत्।।"

इति।। ९।।

आरभ्य चैवं महमाद्यरात्रौ देवार्चनं भूतबलिं च कुर्यात्।
प्रातश्च सायं च परेष्वहस्सु बलिं तदिज्यां सवनत्रयेऽपि।। १०।।

विमर्शिनी

एवं महम् उत्सवमारभ्य आद्यरात्रौ प्रथमदिवसरात्रौ देवार्चनं भूतबलिं च कुर्यात्। परेष्वहस्सु उत्तरदिवसेषु प्रातः सायं च तदिज्यां देवपूजां सवनत्रयेऽपि कुर्यात्।। १०।।

विवरणम्

आरभ्य चैवं महमिति। बीजवापध्वजस्थापनाद्युक्तग्रहणम्। महश्शब्दः उत्सवपर्यायः। परेष्वहस्तु तदिज्यां सवनत्रयेऽपि प्रातश्च, सायञ्च, बलिं कुर्यादित्यनुषङ्गेण योजना।।१०।।

---

२. 'मि' क पाठः।

Shripuram Publications
www.shripuram.org

शुद्धोदकैः स्नानविधौ सदुग्धदध्याज्यगन्धोदकपञ्चगव्यैः।
केरोदकैस्तं कलशैश्च साधु संस्नाप्य देवं विहितक्रमेण॥ ११॥
नवांशुकाभ्यां[1] परिवेष्ट्य[2] यज्ञसूत्रं च कृत्वाथ किरीटपूर्वैः।
विभूषयेत् स्वार्हविभूषणैश्च गन्धैश्च माल्यैरपि मालिकाभिः॥ १२॥

विमर्शिनी

तत्र देवस्य स्नानविधौ स्नानकाले पूर्वं शुद्धोदकैः पुनः सदुग्धदध्याज्यगन्धोदक-पञ्चगव्यैः पृथक् पूजितैरेतैः क्षीराद्यैः केरोदकैः नालिकेरजलैः कलशैश्च (विहित)क्रमेण तं देवं साधु संस्नाप्य वस्त्रेण बिम्बं परिमार्ज्य नवांशुकाभ्यां परिवेष्ट्य यज्ञसूत्रं चांसे कृत्वाथ किरीटपूर्वैः स्वार्हविभूषणैः स्वस्वयोग्यालङ्कारैः गन्धैर्माल्यैर्मालिकाभिश्च विभूषयेत्॥ ११-१२॥

विवरणम्

स्नानविधाविति। माध्यन्दिनाभिप्रायमेतत्। यद्वा सवनत्रयाभिप्रायम्। विहितक्रमेणेति। स्नपनपटल इति शेषः। तत्र शुद्धोदकादिभिस्सप्तस्नानीयद्रव्याण्यपि यथायोगं तत्र तद्द्रव्यकलशसन्निधावेकैकपात्रेषु विहितक्रमेण पूजनीयानि स्नानसमये तैरभिषिच्य पुनर्विहितक्रमेण कलशैरभिषिञ्चेत्। कलशानां नवकं वा केवलद्रव्यात्मकं वा शुद्धोदकान्वितं वा कल्पनीयम्। द्रव्य[3]योगे तु ह्यो निशि सम्पूज्याधिवासहोमं कृत्वा सम्पातस्पर्शनमपि कार्यमिति॥ १२॥

नवाम्बराभ्यामिति। अधरोत्तरवासोभिप्रायम्। यज्ञसूत्रञ्चेति। सौवर्णग्रहणम्। दुर्गायां नैत[4]दुचितम्। माल्यैरिति पुष्पग्रहणम्॥ १२॥

कालेषु त्रिषु सावनैः स्वमनुभिर्मूलेन वा सर्वतः
सम्पूज्याज्यगुलोपदंशकदलीकेरादियुक्तं हविः।
दौग्धाद्यं विनिवेदयेदिह शिवे दौग्धान्नहारिद्रके
सद्यान्तं कृसरं गुलान्नसकलान्ने चाननेषु क्रमात्॥ १३॥

---

१. 'नवाम्बराभ्यां' विवरणकारपाठः। २. 'भूष्य य' इति मूलकोशपाठः। ३. 'या' घ. च पाठः। ४. 'न्न' ख. पाठः।

www.shripuram.org

विमर्शिनी

त्रिषु कालेषु सावनैः सवनभवैः विष्णौ द्वादशाक्षाराष्टाक्षरषडक्षरैर्मन्त्रैः, शिवे प्रासादपञ्चब्रह्मषडक्षरैर्मन्त्रैः, अन्येषु स्वस्वविहितैर्मनुभिर्वा, सर्वतः सर्वदेवेषु सर्वकालेषु च स्वस्वमूलेन वा सम्पूज्याज्यगुळोपदंशकदलीकेरादियुक्तं हविर्विनिवेदयेत्। शिवे त्विह दौग्धाद्यमपि विनिवेदयेत्। तानि पुनः सद्यान्तं भवन्ति। ईशानतत्पुरुषाघोरवामदेव-सद्योजातमुखेषु क्रमाद् दौग्धान्नहारिद्रके दौग्धान्नं पायसं, हारिद्रकं निशाचूर्णेन सह पक्वं, कृसरं तिलैः सह पक्वं, गुलान्नसकलान्ने गुलान्नं सकलान्नं च गुलेन सह पक्वं सकलान्नं तच्चतुष्कमिश्रमिति।। १३।।

विवरणम्

सावनैः स्वमनुभिरिति। तदुक्तं—

"मूलमन्त्रैः समभ्यर्च्य त्रिसन्ध्यं विकिरेद् बलिम्।
द्विषट्केन द्विषट्केन षटकेन सवनत्रये।। इति।
निवेद्यं पायसं प्रातरिष्ट्वा प्रासादविद्यया।
गौळं पञ्चात्मना मध्यं गतेऽर्यमणि पञ्चभिः।।
निवेद्यं कृसरञ्चास्तं मध्यरात्रे नवात्मना। इति।
प्रासादमन्त्रेण च पञ्चमन्त्रैः पञ्चाक्षरेणापि यजेत्त्रिवारम्[१]।।"

इति। शिवेऽर्थान्मन्त्रविकल्पो[२] भवति। एवं दुर्गादिष्वपि ज्ञेयम्। बलिप्रसङ्गे चैतद्दर्शयिष्याम इति। सावनमनुपरिग्रहे प्रथमदिनरात्रौ तीर्थयात्रादिने च मूलविधानेनैव पूजेति ज्ञेयम्। दौग्धाद्यं हविर्विनिवेदयेदिति, विशेषहविषां पायसगौळादिविशेषहविषां ग्रहणम्। तल्लक्षणञ्चैवमुक्तम्—

"येन मानेन गृह्यन्ते तण्डुलाः कमलोद्भवाः।
तद्भागत्रिगुणे क्षीरे सुशृतं पायसं परम्।।
पच्यत्सु तण्डुलेष्वात्मभागाद्विगुणकेऽम्भसि।
तण्डुलांशसमक्षीरे[३] भर्जनस्फुटितांस्तिलान्।।
निधाय तण्डुलार्धांशान् मनाङ् मन्थेन लोलयेत्[२]।

१. 'कालम्' ख. च पाठः। २. 'ल्पोऽपि' भ. ख पाठः। ३. 'रा' ख. पाठः।

Shripuram Publications
www.shripuram.org

क्षीरतुल्यघृतोपेतं सुशृतं कृसरं भवेत्।।
निस्तुषीकृतमुद्गान्नसमतण्डुलषड्गुणे।
निर्जले कपिलाक्षीरे तण्डुलार्धगुळान्विते।।
गुलतुल्यांशकपिलाघृतं मृदितकादळम्।
शुण्ठीजीरकसम्मिश्रं गुळान्नं सुरभीकृतम्।।
भिन्नमुद्गपदे तावन्मा[१]षक्षोदाः पयः पुनः।
नालिकेरोद्भवं शुण्ठी निशाजीरककादळैः।।
क्षीरत्र्यंशैक्षवार्धांशसार्पिर्हारिद्रकं हविः।
हरिद्रामरिचक्षोदशृते पाकक्ष[२]माम्भसि।।
आपक्वतण्डुलेऽध्यर्धभागं घनतरं दधि।
अतिषण्मासवत्सायाः सुरभेर्क्षीरसञ्चितम्।।
सार्धसर्पिर्गुलं त्र्यंशयुतं केवलमेव वा।
सुपक्वं पक्वकदलीपक्वविश्वादिसंयुतम्।।
भक्त्या योजितसिन्धूत्थं दाधिकं साधितं हविः।"

इति। 'क्षीराज्यतण्डुलतिलास्समास्स्युः कृसरान्नके' इति। 'भिन्नमुद्गैस्समन्तण्डुलाः स्युः समास्तस्य चार्धं घृतं स्यात्। घृतार्धं गुळं तत् लभ्यस्तथा गोपयः षड्गुणं स्यात्। गुळान्नं तु तद्युक्तरम्भाफलाढ्यम्।।' इति। शिवे मुखनिवेद्यनियममाह—इह शिव इति। सद्यान्तमीशानादिसद्योजातान्तमुखेष्विति भावः। सकलान्नमिति सद्यास्ये सर्वमेव त्विति चोक्तम्। पायसाद्युक्तचतुर्ग्रहणमेतत्। पयोनिशाचूर्णादिमात्रयोगेन पायसादिसम्भवे तत्सर्वयोगेनैतत्सकलान्नं साध्यम्। शुद्धहविस्समुच्चयोऽपि सर्वत्र सम्भववशादिष्यते। एवं[३] निवेद्यसंस्कारादि सर्वमपि सर्वत्र समानम्। सर्वान्ते प्रधानमुखे सुरभिमुद्रामन्त्रजपादिसर्वमपि पञ्चमुखैकदेवधियापि कार्यम्। होमे बलौ च सर्वेषा[४]मपि विशेषयोग इति।। १३।।

कालद्वयेऽप्युत्सवनामधेयं
बलिं गुरुर्भूतबलिं किरेद् वा।
कालप्रक्लृप्त्योभयमाचरेद् वा।
वक्ष्ये बलिं भौतिकमौत्सवं च।।१४।।

---

१. 'ड' ख. च पाठः। २. 'षे'। ३. 'मे' ख. च पाठः। ४. 'व' च. पाठः।
५. 'मवि' ख. च पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

अथ गुरुः स्वयं कालद्वयेऽपि प्रातस्सायं चोत्सवनामधेयं बलिं वा भूतबलिं वा किरेत्। कालप्रक्लृप्त्या प्रातरुत्सवबलिः सायं भूतबलिरिति क्लृप्त्योभयमाचरेद् वा। भौतिकं भूतबलिम् औत्सवम् उत्सवबलिं च क्रमेण वक्ष्ये।।१४।।

विविरणम्

कालद्वयेऽपीति। प्रातस्सायञ्च। मध्यन्दिनपूजान्ते वा दिवाबलिर्भवति। कालप्रक्लृप्त्योभयमिति। दिवोत्सवबलिं रात्रौ च भूतबलिम्। निशि भूतबलिं दद्यादिति चोक्तम्। यद्वा मध्यदिवसे मध्यदिवसत्रये वा दिवोत्सवबलिमितरकालेषु च भूतबलिं शक्त्यपेक्ष्या चानयोर्बहुधा विकल्पः। वक्ष्ये बलिमिति भूतबलिमुत्सवबलिञ्च क्रमेणेति भावः। नित्यबलिस्तु पुरोक्त एव तत्तद्वारपवाहनेत्यादि। उक्तञ्च—

"स्वस्थाने देवतानाञ्च भूतानान्नामभिः क्रमात्।
विकीर्य बलिपीठे तु बलिशेषं समापयेत्।।
एष नित्यबलिः प्रोक्तस्तथा पारिषदैः सह
गणेभ्यो भूतकूरेण बाह्ये भूतबलिः स्मृतः।
वाचयित्वा गुरुः स्वस्तिं कौतुके स्थाप्य शंकरम्
सर्वोपकरणैः सार्धमुत्सवाख्यं बलिं हरेत्।"

इति। नित्यबलि[१]सद्भावे च नित्यपूजा नित्यबलिकरण[२]पूर्वकमेवायं विशेषपूजा विशेषबलिश्च भौतिक औत्सवो वा यथाकालं कर्तव्य इति ज्ञेयम्।। १४।।

त्रिधा स्वमूलाणुसमर्चितं हवि-
र्विभज्य तद्दैविकमाद्यमंशकम्।
सभूतकूराវितरांशकौ क्रमात्
प्रकल्पयेत् पारिषदं च भौतिकम्।। १५।।

विमर्शिनी

स्वमूला[३]णुना समर्चितं हविस्त्रिधा विभज्य तेष्वाद्यमंशकं तद्धविर्दैविकं प्रकल्पयेत्।

---

१. 'लिकरण' ख. पाठः। २. 'णमेवा' क पाठः। ३. 'णुस' ख. ङ पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

इतरांशकौ सभूतकूरौ "पललं रजनीचूर्णं सलाजं दधि सक्तुकम्" इत्युक्तभूतकूरयुक्तौ क्रमेण पारिषदं भौतिकं च प्रकल्पयेत्।। १५।।

विवरणम्

त्रिधेति। स्वमूलाणुसमर्चितं हविस्त्रिधा विभज्येत्यन्वयः।

"सुमृष्टालिप्तभूभागे पत्राण्यास्तीर्य सन्ततम्।
क्षाळितानि घृतेनोपस्तीर्य सम्पादयेद्धविः।।
प्रोक्ष्यास्त्रेण त्रितालादि कृत्वा शोषादिपूर्वकं।
पीठमिष्ट्वार्चिते शक्त्या मूलेनावाह्य पूजयेत्।।"

निवेद्यसंस्कारा[1] यथार्हं कार्या इति। पुनस्त्रिधा विभज्याद्यमांशकं तद्दैविकं कल्पयेत्। उदङ्म[2]ध्यदक्षिणक्रमेणायं त्रेधा विभागः। तदिति। तदेव शुद्धमेव नान्यमिश्रितमिति भावः। स भूतकूराविति भूतकूरं पुरोक्तं-'हारिद्रं दधिलाजसक्तुपललाढ्यं भूतकूराह्वयमि'ति। भूतकूरं विभागौचित्येन तद्धविषि योजयित्वा पूजा कार्या विभज्य वास्त्रप्रोक्षणादिसंस्कृतं भूतकूरं योजनीयमिति। देवा इन्द्रादयः तत्कक्ष्यावेशिनो द्वाःस्थमातृप्रभृतयश्च तेषां पारिषदस्तत्पार्श्वमण्डलवर्तिनः वक्ष्यति च तत्तत्पार्श्वपद इति शेषः। भूता इति विभागः।। १५ ।।

निर्माल्यभुक्पश्चिममुख्यदेवता-
स्विष्टं हविर्दैविकमन्यदन्यतः।
आमन्त्रणं चाञ्चितवाद्यघोषणै-
रत्रादितो भूतगणस्य कारयेत्।। १६।।

विमर्शिनी

निर्माल्यभुक्पश्चिममुख्यदेवतासु द्वाःस्थादिनिर्माल्यधार्यन्तासु मुखभवासु विशिष्टासु वा देवतासु दैविकं हविरिष्टम्। अन्यतोऽन्यत् पारिषदेषु पारिषदं भूतेषु भौतिकं च। अत्र बलिकाले आदित आरम्भे अञ्चितवाद्यघोषणैः यथोपपत्ति पूजितानां वाद्यानां घोषणैः भूतगणस्यामन्त्रणमाह्वानं कारयेत्।। १६।।

---

१. 'रर्हिं' क पाठः। २. 'प्ये' क पाठः।

Shripuram Publications
www.shripuram.org

विवरणम्

तदेवद्दर्शयति—निर्माल्यभुक्पश्चिममुख्यदेवतास्विति। मुख्यशब्दः प्रधानवचनः। अन्यदन्यत इति। परिषद्भूतविवेकस्त्वर्थगम्य एवेति भावः। तान्भागान् देवेभ्यो नमः परिषद्भ्यो नमः भूतेभ्यो नमः इत्यभिमृशेदिति कल्पयेदित्यनेनैव लभ्यते। पुनस्तालत्रयादि[1]क सर्वमर्थसिद्धम्। अत्रादितोऽञ्चितवाद्यघोषणैर्भूतगणस्यामन्त्रणञ्च कारयेदिति। आदितः प्रथमतः सम्प्रार्थ्य देवमित्यतः पूर्वमित्यर्थः। अञ्चितेतिगन्ध-पुष्पस्रग्वस्त्राद्यलङ्कृतत्वमुक्तम्। यद्वा आदित इति देवपूजातो देवार्थनातश्च पूर्वमेवेति भावः। अञ्चितेति पूजितत्व-मलङ्कृतत्वं चोक्तम्। तदुक्तमथ ध्वजस्य तु पुरत इत्यादि। घोषणैः इति बहुवचनं त्रिविधपाण्यभिप्रायम्। कारयेदिति वादकेषु तन्नियोगोऽवसाने पुष्पाराधनपूर्व-कमर्घ्यदानमित्यप्युक्तम्। वाद्यपूजां तूपरि वक्ष्यामः।।१६।।

सम्प्रार्थ्य देवं बलिकौतुके स्वे
संयोज्य सन्धार्य च मूर्तिपेन।
तत्साक्षिकं क्लृप्तसुदीप्तदीप-
वाद्यादिहृद्यं बलिमातनोतु।।१७।।

विमर्शिनी

देवं संप्रार्थ्य 'सृष्टिस्थितिविनाशानामि'त्यादिना प्रार्थ्य स्वे बलिकौतुके बल्यर्थं विरचिते बिम्बे संयोज्य मूर्तिपेन सन्धार्य धारयित्वा तत्साक्षिकं देवसाक्षियुक्तं क्लृप्तसुदीप्तदीपवाद्यादिहृद्यं क्लृप्तेन सुतरां दीप्तेन दीपेन वाद्यादिना वाद्यगान-नृत्तादिभिश्च हृद्यं यथा भवति तथा बलिमातनोतु।। १७।।

विवरणम्

सम्प्रार्थ्य देवमिति। गर्भगृहं गत्वा पीठेज्यापूर्वकं देवमावाह्य सकलीकृत्य तदिज्यां विधायार्ध्यं दत्त्वा प्रार्थना कार्या। बलिकौतुके स्वे संयोज्येति। देवमित्यनुवर्तते। कर्माचा-मभिषिच्येत्यादिवक्ष्यमाणावाहनाद्यनुसारेणावाहनमेतदभिप्रेतम्। संयोज्येत्येवमभिधानेन संक्षालिते कर्मबिम्बे मूलबिम्बे मूलबिम्बतो मूलपुष्पार्पणमर्ध्यदानमितीयदप्य[2]वश्यंकार्यमित्यपि सूचितम्। सन्धार्य च मूर्तिपेनेति। यदुक्तं—

---

१. 'दि स' ख. च. पाठः। २. 'श्यमि' क पाठः।

Shripuram Publications
www.shripuram.org

"शिष्याणामेकमाहूय सोष्णीषं सोत्तरीयकम्।
ध्यात्वा तमृषभं मन्त्री देवं तन्मूर्ध्नि विन्यसेत्।।
वस्त्रास्तीर्णे स्थिते पात्रे सौवर्णे राजतेऽपि वा।
प्राकारान्तः करद्वन्द्वे तद्बहिर्मूर्ध्नि विन्यसेत्।।"

इति। करपुटे पद्ममात्रमिष्ट्वा तत्र कौतुकं निधेयमिति। तत्साक्षिकं बलिमातनोत्वित्यन्वयः। गुरोर्दक्षिणतः सदा देवेन भाव्यम्। तत्साक्षिकमिति तथानुसन्धानार्थमुक्तम्। क्लृप्तसुदीप्तदीपवाद्यादिहृद्यमित्यष्टमङ्गलधूपादीनां छत्रध्वजवितानचामरादीनां नृत्तगीतादीनां मङ्गलस्तोत्रादीनां च यथासम्भवं ग्रहणम्।। १७।।

सृष्टिस्थितिविनाशानां कर्तर्भूतपते! प्रभो!।
त्वत्पारिषदमुख्यानां बलिदानाय शाधि माम्।।। १८।।

विमर्शिनी

प्रार्थनामन्त्रं पठति — सृष्टिस्थितीति ।। १८।।

विविरणम्

सम्प्रार्थ्य देवमित्यत्र प्रार्थनामन्त्रमाह — **सृष्टिस्थितीति।। १८।।**

प्रोक्ष्याराध्य विभाव्य तत्र वसुपत्राब्जस्थितां[1] देवतां[2]
पाद्याद्यं प्रसमर्प्य तत्तदणुना सम्पूज्य दत्त्वा बलिम्।
तत्तत्पार्श्वपदे प्रदाय परिषण्मन्त्रेण मूलेन च
प्राप्यापो बलिमुद्रया प्रधिनुयादेवं बलिप्रक्रिया।। १९।।

विमर्शिनी

बलिक्लृप्तिमाह — प्रोक्ष्येति। बलिपीठेषु जलेन प्रोक्ष्य पुष्पेणाराध्य तत्र वसुपत्राब्जस्थिताम् अष्टदलपद्मे स्थितां देवतां विभाव्य ध्यात्वा पाद्याद्यमुपहारजातं प्रसमर्प्य तत्तदणुना जलगन्धादिभिः सम्पूज्य बलिं दत्त्वा तत्तत्पार्श्वपदे तस्य तस्य पार्श्वस्थाने परिषण्मन्त्रेण तत्तत्परिषण्मन्त्रेण मूलेन च बलिं प्रदाय चापः प्राप्य बलिमुद्रया प्रधिनुयात् प्रीणयेत्। एवं बलिप्रक्रिया बलिदानप्रकारः।। १९।।

---

१. 'ता'। २. 'ताः' घ पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

सर्वत्र बलिप्रक्रियामपि दर्शयति-प्रोक्ष्येति। द्वाःस्थवाहनादिदेवतानां यत् स्वं स्वमर्चयितुं स्थानं तत्र तदभिमुखं स्थित्वास्त्रेण फडन्तप्रणवेन वा प्रोक्ष्य तदीयमन्त्रेण तस्मिन्पीठे बिम्बे वैवंभावनया पुष्पमाराधयेत्। पाद्याद्यमिति। यथा स्वं पाद्यार्घ्याचमनमुक्तम्। सम्पूज्येति। यदुक्तं

"पाद्यार्घ्याचमनं गन्धं पुष्पं धूपञ्च दीपकम्।
जलं बलिं ततो दत्त्वा बलिमुद्रां च दर्शयेत्।।"

इति। दत्त्वा बलिमिति। तत्तन्मन्त्रेण दैविकहविषा त्रिवारमिति भावः। बलिपीठे तु तास्मिन्नेव बलिदानं बिम्बे तु तदग्रतः स्थण्डिल इति ज्ञेयम्

तत्तत्पार्श्वपद इति[१]। पार्षदान् पार्श्वमण्डल इति चोक्तम्। जलगन्धादिपूजा तेषामपि कार्या। पार्षदहविषा च बलिदानं मूलेन चेति। सकृदिति शेषः। प्राप्यार्प इति। सपारिषदस्य प्रधानस्येति भावः। बलिमुद्रया प्रधिनुयादिति। बलिमुद्रां वक्ष्यति 'हृद्बद्धमुष्टिर्बलिमुद्रिके'त्यादि। तथा प्रीणयेदित्यर्थः। जलार्पणानन्तरं पुष्पाराधनं बलिमुद्रानन्तरम् अञ्जलिकरणञ्च कार्यमिति।।१९।।

द्वाःस्थौ पार्श्वद्वये द्वार्यजितपुरमुरद्वेषिणोर्मण्डपेऽग्र्ये
वाहं पृष्ठेऽहिराजं यजतु सगणपं दक्षिणे दक्षिणेशम्।
शेषेष्वेतानशेषान् स्मरजिति गतवाहाहिपान् द्वाःस्थवत्सु
द्वाःस्थान् सर्वेष्वथाग्र्यादिकदिगधिपतीन् वाहनान्तान् दशेशे।। २०।।

विमर्शिनी

अत्र भूतबलेः क्रममाह-द्वाःस्थाविति। अजितपुरमुरद्वेषिणोः विष्णुशिवनारायणयोः द्वारि पार्श्वद्वये द्वाःस्थौ यजतु। अग्र्ये मण्डपे वाहं च, पृष्ठे अहिराजमनन्तं, दक्षिणे द्वारि पार्श्वद्वये सगणपं गणपतिसहितं दक्षिणेशं दक्षिणामूर्तिं च, शेषेषु पञ्चसु देवेषु एतानुक्तान् द्वाःस्थादीन् अशेषान् शेषनाम्नानन्तेन रहितान्, स्मरजिति गतवाहाहिपान् रहितवाहा[२]नन्ताभ्यां युक्तान्, द्वितीयद्वाःस्थवत्सु देवेषु द्वितीयद्वाःस्थांश्च, अथ सर्वेष्वप्यग्र्यादिकदिगधिपतीन् दश, ईशे तु बाहनान्तान् अन्ते वाहनेन युक्तान् तांश्च यजतु।। २०।।

---

१. 'ति मण्ड' च पाठः। २. 'हनान' क. ख. ङ पाठः। Shripuram Publications
www.shripuram.org

विवरणम्

प्राकारान्तर्देवताक्रममपि दर्शयति—द्वाःस्थाविति। द्वारि पार्श्वद्वये द्वाःस्थावित्यन्वयः। यजत्विति च सर्वत्र सम्बध्यते। द्वाःस्थक्लृप्तिं वक्ष्यतिप्रासादान्तर्बहिरपीत्यादि। प्रासादा[१]न्तर्भागे देववशाद्दक्षिणपार्श्वभागे वामपार्श्वभागे चान्तर्द्वाःस्थौ प्रथममिष्ट्वा बलिं हरेदुक्तविधयेत्यर्थः। मण्डपेऽग्र्ये वाहमिति। मुखमण्डपे वाहनसम्भवे तत्र तदभावे नमस्कारमण्डपे तदसंभवे चैतत्[२]स्थान इत्यर्थः। पृष्ठेऽहिराजमिति। देवस्यार्थात् प्रासादस्य पृष्ठभागेऽनन्तमिति। दक्षि[३]णे सगणपं दक्षिणेशमिति। देवस्यार्थात् प्रासादस्य च दक्षिणद्वारभागतो देववशाद्दक्षिणतो वामतश्च गणपतिं दक्षिणामूर्तिञ्चेत्यर्थः। शेषेष्वेतानशेषानिति। शेषोऽनन्तः। दुर्गास्कन्दादिषु शेषदेवेष्वेतानन[४]न्तरहितान् द्वाःस्थद्वयवाहनगणपतिदक्षिणामूर्तीनित्यर्थः। स्मरजिति गतवाहाहिपानिति। अहिपोऽनन्तः वाहनानन्तरहितानेतानिति। तदुक्तं—'नन्दिनं च महाकालं गणेशं दक्षिणेश्वरम्' इति। द्वाःस्थवत्सु सर्वेषु द्वास्थानित्यन्वयः। प्रासादबहिर्द्वाःस्थाभिप्रायमेतत्। अथाग्न्यादिकदिगधिपतीन् दशेत्यन्वयः। दिगधिपतयो बलिपीठदेवताः। प्राग्द्वार इन्द्रादीन् प्रत्यग्द्वारे तु वरुणादीनिति भावः[२]। मुखादिसुरपुङ्गवानिति चोक्तम्। नवमदशमौ ब्रह्मानन्तावेव। वक्ष्यति च 'येन सृष्टं पन्नगाधिपतिर्देव' इति च। तत्रेशानपीठबहिरीशदक्षिणतो ब्रह्मा निर्ऋतिपीठबहिरीषदुत्तरतश्चानन्तः। यदुक्तं 'चालिताः किञ्चनातः प्रादक्षिण्यादि'ति। सर्वेषां मुखक्लृप्तिश्चोक्ता। महादि[५]ङ्मुखाः सम्मुखाश्चेत्यादि ईशे वाहनान्तानिति। तदुक्तं 'दिक्पान् वाहनमेव चे'ति।।२०।।

लोकेशोपरि मातृशास्तृमहिषद्विट्षण्मुखार्थाधिभू-
निर्माल्यामृतभोजिनश्च निखिलेष्वप्यर्चयेत् स्वास्पदे।
सोमानन्तरमेव वार्हतु धनाध्यक्षं तथान्तर्बहि-
र्द्वाःस्थेज्योपरि वाहनादिकसमिज्या वैवमन्तर्बलिः।।२१।।

विमर्शिनी

निखिलेष्वपि देवेषु लोकेशोपरि लोकेशानां पूजानन्तरं मातृशास्तृमहिषद्विट्षण्मुखार्थाधिभूनिर्माल्यामृतभोजिनश्च मातृः शास्तारं दुर्गां स्कन्दं वैश्रवणं

१. 'दद्वारेऽन्त ख. च पाठः। २. 'च' ख. च पाठः। ३. 'णे ग' क पाठः। ४. 'नन्त' ख. पाठः। ५. 'वः। न' क. ख. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

निर्माल्यधारिणं च स्वास्पदे स्वस्वस्थानेऽर्चयेत्। धनाक्ष्यक्षं वैश्रवणं सोमानन्तरं सोमस्य पूजाया अनन्तरं तदुत्तरे वा अर्हतु पूजयेत्। तथान्तर्बहिर्द्वाः स्थेज्योपरि अन्तर्द्वाःस्थानन्तरमेव[१] बहिर्द्वाःस्थावभ्यर्च्य पुनर्वाहनादिकसमिज्या वाहनादीनां पूजा वा कार्या। एवमन्तर्बलिः अन्तर्भागगतो बलिः स्यात्।।२१।।

विविरणम्

लोकेशोपरीत्यनुवादः। शिवे लोकेशवाहनोपरीति च ज्ञेयम्। महिषद्विड् दुर्गा। अर्थाधिभूर्वैश्रवणः। निर्माल्यामृतभोजी विष्वक्सेनादिः। स्वास्पद इति। स्वे स्वे स्थाने। तदपि प्रागुक्तमेव धनाध्यक्षमिति वैश्रवणम्। तथान्तर्बहिर्द्वाःस्थेज्योपरि वाहनादिकसमिज्या वेति। सर्वेष्वपि क्रमविकल्प उक्तः। यथोक्तं -"चण्डप्रचण्डौ सम्प्रोक्तावन्तर्द्वारस्य पालकौ। बहिर्द्वाःस्थौ शक्रशङ्खपाणी तत्रैव पूजयेत्"।। इत्यादि। एवमन्यत्रापि द्रष्टव्यमिति। एवमन्तर्बलिरिति। भूतबलेराभ्यन्तरमर्धमेवमुक्तमिति भावः।।२१।।

प्रासादान्तर्बहिरपि सभान्तर्बहिश्चाजितेशे
द्वाःस्थास्तेष्वन्तिमविरहिता वाद्यहीना रमेशे।
अन्त्यस्थानस्थितविरहिताः शर्वशास्त्रोः कुमार्या-
माद्योना वा गुहगणपयोर्वा तथाद्यन्तहीनाः।।२२।।

विमर्शिनी

द्वाःस्थानां क्लृप्तिमाह—प्रासादान्तरिति। अजितेशे प्रासादान्तर्बहिः प्रासादस्यान्तर्भागे बहिर्भागे च सभान्तर्बहिश्च सभाया अन्तर्बहिश्चेति चतुर्विधा द्वाःस्थाः। रमेशे तेषु द्वाःस्थेषु मध्ये अन्तिमविरहिताः सभाया बहिर्द्वाःस्थविरहिता वा आद्यहीनाः प्रासादान्तर्द्वाःस्थविरहिता वा। शर्वशास्त्रोः अन्त्यस्थानस्थितविरहिताः सभाबहिर्द्वाःस्थरहिताः। कुमार्याम् आद्योना वा चतुर्विधद्वाःस्थयुक्ता वा। गुहगणपयोस्तथा आद्यन्तहीना वा।।२२।।

विवरणम्

अजितेशे द्वाःस्था इति। हरिहर एवञ्चत्वारो युगलाद्विपार्श्वभाज इति भावः। रमेशे तेष्वन्तिमविरहिता आद्यहीना वेत्यन्वयः। प्रासादबहिस्सभान्तर्बहिरपि[२]। यद्वा

---

१. 'खा श्चे' क पाठः। २. 'व बहिर्द्वाःस्थानन्तरमेव बहि' च. पाठः। ३. 'पि स' क पाठः।

Shripuram Publications
www.shripuram.org

प्रासादान्तर्बहिरपि सभान्तश्चेति। त्रय एव युगला इति भावः। अन्त्यस्थानस्थितविरहिता इति। न सभाबहिर्द्वाःस्थाविति भावः। कुमार्यामाद्योना वेति। हरिहरवच्चत्वारो वापि युगलास्स्युरिति विकल्पाभिप्रायः। गुहगणपयोस्तथा वाद्यन्तहीनावेत्यन्वयो द्रष्टव्यः। तथावेत्यनेन अन्त्यस्थानस्थितविरहिता इत्येतस्य ग्रहणम्।।२२।।

प्रासादान्तर्नन्दिचण्डौ हरीशे
स्यातां तद्बाह्ये जयत्सेननामा।
विष्वक्सेनश्चाप्युमा श्रीः सभान्तः
शूलं चक्रं तद्बहिश्च क्रमेण।।२३।।

विमर्शिनी

तेषां नामानि कथयति— प्रासादेति। हरीशे प्रासादान्तः नन्दिचण्डौ स्याताम्। तद्बाह्ये प्रासादबाह्ये जयत्सेननामा विष्वक्सेनश्च। सभान्तश्चापि उमा श्रीरपि। तद्बहिः क्रमेण शूलं चक्रं च।।२३।।

विवरणम्

तद्बाह्य इति। प्रासादबहिर्भागे[1]। तद्बहिश्चेति। सभाबहिर्भागे।।२३।।

चण्डप्रचण्डावरिशङ्खपाणी
श्रीः पुष्टिसंज्ञाप्यजितेऽग्र्यपक्षे।
स्थिताः क्रमाच्चक्रदरादिपाणी
श्रीपुष्टिबाह्ये भवतोऽन्यपक्षे।।२४।।

विमर्शिनी

अतिजे अग्र्यपक्षे पक्षयोः प्रागुक्तपक्षे अन्तिमरहितपक्षे चण्डप्रचण्डौ अरिशङ्खपाणी चक्रपाणिः शङ्खपाणिश्च श्रीः पुष्टिसंज्ञापि स्थिताः। अन्यपक्षे आद्यरहितपक्षे श्रीपुष्टिबाह्ये चक्रदरादिपाणी चक्रपाणिः शङ्खपाणिश्च भवतः। तत्र प्रासादबहिर्द्वार एव चण्डप्रचण्डौ।।२४।।

---

१. 'गे।अ' क पाठः।

Shripuram Publications
www.shripuram.org
www.shripuram.org

विवरणम्

अग्र्यपक्ष[1] इति। तेष्वन्तिमविरहिता इत्यस्मिन् पक्षे चक्रदरादिपाणी इति। आद्यहीना इत्यस्मिंस्तु पक्षे श्रीपुष्टिबाह्ये चक्रपाणिशंखपाणी स्यातामित्यर्थः। आद्यहीना इति निर्देशादेव चण्डप्रचण्डौ प्रासादबाह्ये भवतः इति।।२४।।

प्रासादस्थाः प्रोक्ता नन्दिमहाकालशूलपाण्यभिधाः।
सहपरशुपाणयोऽन्तस्सदसि शिवे तीक्ष्णदन्तसमृगास्यौ।।२५।।

विमर्शिनी

शिवे नन्दिमहाकालशूलपाण्यभिधाः नन्दी महाकालः शूलपाणिश्च सहपरशुपाणयः परशुपाणिश्च एते प्रासादस्था द्वाःस्थाः प्रोक्ताः। अन्तस्सदसि सभाया अन्तः तीक्ष्णदन्तसमृगास्यौ तीक्ष्णदन्तो मृगास्यश्च।।२५।।

विवरणम्

अन्तस्सदसीति। सभान्तरित्यर्थः।।२५।।

शास्तरि शस्ताः क्रमशः क्षुरिकापाणिश्च खड्गहस्तश्च।
अथ वीरबाहुसमहावीरौ तीक्ष्णदन्तश्च।।२६।।

विमर्शिनी

शास्तरि क्षुरिकापाणिश्च खड्गहस्तश्च अथ वीरबाहुसमहावीरौ वीरबाहुः महावीरश्च तीक्ष्णश्च तीक्ष्णदन्तश्च द्वाःस्थाः शस्ताः।।२६।।

विवरणम्

तीक्ष्णश्च तीक्ष्णदन्तश्चेति। सभान्तरिति भावः।।२६।।

प्राक् चण्डिकाम्बिके स्तो ह्लादिन्यपि मोदिनी सभान्तःस्थे।
तत्र बहिर्विजयन्तीकात्यायन्यौ च दुर्गायाम्।।२७।।

---

१. 'ग्र' च पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

दुर्गायां प्राक् पूर्वं चण्डिकाम्बिके स्तो भवतः। प्रागित्यनेन क्वचित् पक्षे जयाविजयाभ्यां च योगः सूचितः। सभान्तःस्थे सभाया अन्तर्भागस्थे ह्लादिनी मोदिन्यपि भवतः। तत्र सभाया बहिः विजयन्तीकात्यायन्यौ च।।

विवरणम्

प्राक् चण्डिकाम्बिके स्त इति। प्रासादस्य बहिरिति भावः। हरिहरवद् द्वाःस्थपक्षे तु चण्डिकाम्बिका चान्तः, जया विजया च बहिरिति ज्ञेयम्। तथा चोपरि वक्ष्यामः।।२७।।

वह्निभुवि वज्रहस्तः प्रासादे शक्तिपाणिश्च।
सदसि पुनरग्निकेतुर्द्वाःस्थौ स्तः सूर्यकेतुश्च।।२८।।

विमर्शिनी

वह्निभुवि प्रासादे वज्रहस्तः शक्तिपाणिश्च. सदसि सभायां पुनरग्निकेतुः सूर्यकेतुश्च द्वाःस्थौ स्तः।।२८।।

विवरणम्

प्रासाद इति। तत्र बहिरित्यर्थः। अन्त्यस्थानस्थितविरहिता इत्यस्मिन् पक्षे तु वज्रहस्तः शक्तिपाणिश्चान्तः, सुकुमारो भद्रसेनश्च बहिरिति ज्ञेयम्।।२८।।

प्रासादद्वारगतौ विघ्नेशे वज्रदन्तगजास्यौ[१]।
स्यातां च चण्डविक्रमविघ्नकरौ कीर्तितौ सभान्तःस्थौ।।२९।।

विमर्शिनी

विघ्नेशे प्रासादद्वारगतौ वज्रदन्तगजास्यौ वज्रदन्तो गजास्यश्च। सभान्तःस्थौ चण्डविक्रमविघ्नकरौ कीर्तितौ स्याताम्।।२९।।

स्थाणौ वृषो मुररिपौ गरुडो द्वयात्मा
शाङ्गींश्वरेऽथ गणराजि महादिचाषः।
आर्ये हयः शिखिभवे शिखिकुक्कुटौ च
सिंहो निसुम्भजिति वाहनकेतनाङ्काः।।३०।।

---

१. 'गजास्यौ' इति मूलकोशपाठः।

www.shripuram.org

विमर्शिनी

बाहननामाह——स्थाणाविति। अथ स्थाणौ वृषः ऋषभः। मुररिपौ गरुडः। शाङ्गींश्वरे द्वयात्मा ऋषभगरुडात्मा। गणराजि महादिचाषः महाचाषः। आर्ये हयः अश्वः। शिखिभवे स्कन्दे शिखिकुक्कुटौ। तत्र शिखी वाहनं, कुक्कुटो ध्वजलक्षणम्। निसुम्भजिति सिंहः। एते वाहनकेतनाङ्काः वाहनानि ध्वजलक्षणानि च।।३०।।

विवरणम्

द्वयात्मेति। वृषाय गरुडात्मने इति मनुरनेन सूचितः। यद्वाकारसूचनमप्यनेन कृतम्। तदुक्तं-

"वृषञ्च वैनतेयञ्च पृथग्रूपेण कारयेत्।
वृषोपरि यथा पक्षी वैनतेयः सुतुण्डवान्।।"

इति। महादिचाष इति, महाचाषः। हयोऽश्वः। शिखिकुक्कुटौ चेति। वाहनद्वयमिति भावः। वाहनकेतनाङ्का इति। मण्डपे वाहनानि, बहिर्ध्वजेषु लक्षणभूताश्चेत्यर्थः। स्कन्दे तु ध्वजे विशेषः। यदुक्तं—"मयूरं स्थापयेद्वाग्रे वार्क्षजं कुक्कुटं तु वा' इति। ध्वजश्च कुक्कुटारूढ इति।।३०।।

द्वाःस्थान्[१] प्राच्य बहिर्निरेत्य च सभाया ये समस्तादिना
विज्ञाप्य ध्वजदेवताश्च परितस्तत्तद्गणांस्तब्दहिः।
पीठे स्वावरणावृतं परिषदध्यक्षं ततोऽष्टग्रहान्
दिक्षु क्षेत्रपतिं यजेदुदितिदिश्येवं बहिः स्याद् बलिः।।३१।।

विमर्शिनी

बहिर्बलिविधिमाह—द्वाःस्थानिति। सभाद्वाःस्थान् प्राच्य, सभाया बहिर्निरेत्य निर्गत्य, ये समस्तादिना 'ये समस्तजगदि'त्यादिना मन्त्रेण सर्वान् विज्ञाप्य, परितो ध्वजदेवताश्च यजेत्। तद्बहिरावरणे तत्तद्गणांश्च पञ्चाशद्भूतगणादींश्च, पुनः पीठे महापीठे स्वावरणावृतं स्वस्वपरिवारोपेतं परिषदध्यक्षं हरिसेनादिभूताधिपं च,

१. 'स्थौ' इति मूलकोशपाठः।

Shripuram Publications
www.shripuram.org

ततो दिक्ष्वष्टग्रहान्, उदितिदिशि ईशानपश्चिमे क्षेत्रपतिं च यजेत्। एवं बहिः बहिर्गतो बलिः स्यात्।।३१।।

विवरणम्

इदानीमस्यैव भूतबलेर्बाह्यमर्थमाह—द्वास्थौ प्राच्येति। सभायामन्तर्बहिरुभयतो वावस्थितौ द्वाःस्थावित्यर्थः। ये समस्तादिना विज्ञाप्येति। बहिर्मुखतयोपस्थानमेतदुक्तम्[1]। ध्वजदेवताश्च परित इति। दिक्पालवदग्र्यादिका[2] इति ज्ञेयम्। यजेदिति च सर्वत्र सम्बध्यते। तद्बहिस्तत्तद्गणानिति द्वितीयावृतिः। ततोऽष्टग्रहान् दिक्ष्विति। देवग्रहाद्यभिप्रायम्। तेऽप्यग्र्यादिका स्युरिति। क्षेत्रपतिमिति सर्वावरणबहिरुदितिदिग्भागे क्षेत्रपालं गन्धपुष्पादिभिर्बलिना पात्रशेषेण च यजेदित्यर्थः। तदुक्तं—

"मण्डलं विपुलं कृत्वा शेषान्नं सर्वमेव तु।
तत्रैव निक्षिपेन्मन्त्री गन्धपुष्पसमायुतम्।।"

इति। महता मुष्टित्रयेण बलिं दत्त्वा पात्रशेषमग्रे न्यस्य सुरभिमुद्रां कृत्वा क्षेत्रपालाय निवेद्य पानीयादि दत्त्वा समर्च्य[3] ब्रह्मार्पणादि कृत्वा तत्प्रसादतीर्थं सर्वेभ्यः प्रोक्ष्येति। वक्ष्यति च शेषं क्षेत्राधिपाय चेति।।३१।।

नन्दी महाकालसभूतनाथमहीधराख्यौ सहपर्वतेशौ।
ततो गुहेशाभिधकालपाशकपालिनश्चाष्ट शिवे ध्वजेशाः।।३२।।

विमर्शिनी

शिवादिध्वजेशान् क्रमेण पठति—नन्दीति। इति शिवे इत्यष्ट ध्वजेशाः स्युः।।३२।।

विवरणम्

नन्दीति। प्रत्यङ्मुखे पर्वतेशादयः। एवं स्कन्दादिष्वपि बोद्धव्यम्।।३२।।

सदेवसेनापतिरग्निलोचनः
सदण्डहस्तोऽप्यसिधारिसंज्ञकः[4]।।३३।।

---

१. 'यावस्था' च पाठः। २. 'का ज्ञे' क पाठः। ३. 'र्प्य' ख. च पाठः। ४. 'ज्ञितः' ग पाठः।

Shripuram Publications www.shripuram.org

सकालपाशो ध्वजशेखराभिधो

गदी पुनः शूलविलासिनामकः॥३३॥

विमर्शिनी

गुहे नव ध्वजेशान् पठति—**सदेवसेनापतिरिरिति**॥३३॥

विप्रप्रियश्चेति नव ध्वजेशा

गुहेऽन्तिमः शर्वदिशीह कार्यः।

स्वमण्डपप्रोक्तचराः परेषु

गणेश्वरे द्वारघटे[१] प्रदिष्टाः॥३४॥

गुहे अन्तिमो विप्रप्रियः शर्वदिशि कार्यः। परेषु हरौ शिवनारायणदुर्गाशास्तृषु च स्वमण्डपप्रोक्तचराः स्वस्वमण्डपसंस्कारे ध्वजेषूक्ताः। तत्र हरौ कुमुदाद्याः, शिवनारायणे नन्दिकुमुदात्माद्याः, दुर्गायां काल्याद्याः, शास्तरि गोप्त्राद्याः, गणेश्वरे द्वारघटपूजायामुक्ता वज्रदन्ताद्याः प्रदिष्टाः॥३४॥

विवरणम्

स्वमण्डपप्रोक्तचराः परेष्विति। विष्ण्वादिषु तत्तन्मण्डपसंस्कारे ध्वजेशतयैव प्रोक्तपूर्वा इत्यर्थः। यथा कुमुदकुमुदाक्षसंज्ञावित्यादि। गणेश्वर इति। यथा गणराजि वज्रदन्त इत्यादि॥३४॥

विंशद्भूतगणाः स्मृताः स्मररिपौ दिग्दिक्षु पञ्चाशतो-

द्भिन्नाश्चाष्टसु दिक्षु शाङ्र्गभृति सप्तत्या तथेशाच्युते।

षट्कोट्योद्भिदुरा गुहे महिषहन्त्र्यामष्टकोट्या तथा

तत्तत्पारिषदाः प्रभेशगणपत्योश्च द्वितीयावृतौ॥३५॥

विमर्शिनी

द्वितीयावरणबलिदेवता आह—विंशदिति। द्वितीयावृतौ स्मररिपौ दिग्दिक्षु दशदिक्षु विंशद्भूतगणाः स्मृताः। शाङ्र्गभृति चाष्टसु दिक्षु पञ्चाशतोद्भिन्नाः पञ्चाशद्भूतगणाः। ईशाच्युते तथा सप्तत्या उद्भिन्नाः सप्ततिभूतगणाः। गुहे षट्कोट्योद्भिदुराः

---

१. 'टप्र' इति मूलकोशपाठः।

Shripuram Publications
www.shripuram.org
www.shripuram.org

षट्कोटिभूतगणाः। महिषहन्त्र्याम् अष्टकोट्या उद्भिदुराः अष्टकोटिभूतगणाः। प्रभेशगणपत्योः तत्तत्पारिषदाः विघ्नपार्षदा[1]ः शास्तृपार्षदा[2]श्च स्मृताः।।३५।।

विवरणम्

दिग्दिक्ष्विति। दशदिशामष्टदिशाञ्च विकल्पाभिप्रायम्। पञ्चाशतोद्भिन्ना इति। गणा इति शेषः। यदुक्तं-'तत्पार्श्वमण्डले भूयः पञ्चाशद्गणमर्चयेत्' इति। सप्तत्या षट्कोट्येत्यादावप्युद्भिदुरा गणा इति योज्यम्। तत्तत्पारिषदा इति तत्तद्ध्वजाधिपपारिषदाः। यथा शास्तरि गोप्तृपारिषदेभ्यः इत्यादि।।३५।।

बलिपीठस्य समन्ताद्बलिजिति वलजिन्मुखाष्टदिक्क्रमतः।
कुमुदाद्यष्टकमिष्ट्वा मध्येपीठं यजेत हरिसेनम्।।३६।।

विमर्शिनी

महापीठावरणान्याह—बलिपीठस्येति। बलिजिति विष्णौ बलिपीठस्य समन्ताद्

वलजिन्मुखाष्टदिक्क्रमतः इन्द्राद्यष्टदिक्षु कुमुदाद्यष्टकमिष्ट्वा मध्येपीठं पीठोपरि मध्यभागे हरिसेनं यजेत।।३६।।

विवरणम्

वलजिन्मुखाष्टदिक्क्रमत इति। महाबलिपीठस्य प्राङ्मुखत्वे प्रत्यङ्मुखत्वे प्रागाद्यष्टदिक्ष्वे[3]व परिपीठिकासु क्रमेण बलिः स्यादिति भावः। मध्येपीठमिति महापीठमध्यत इत्यर्थः।।३६।।

पुरभिदि भूतिदसंज्ञं सदुर्निरीक्षं सभीमरूपमथ।
यजतु सुलोचनसुमुखौ समहाबाहू दिशास्वधश्चोर्ध्वम्।।३७।।

त्रिशिरस्त्रिभुजौ पिङ्गलहरिसेनौ चाह्वयैर्द्विठान्तैः स्वैः।
चतुरो भूतिदपूर्वांश्चतुरः कुमुदादिकांश्च शाङ्गींशे।।३८।।

विमर्शिनी

पुरभिदि भूतिदं दुर्निरीक्षं भीमरूपं सुलोचनं सुमुखं महाबाहुं त्रिशिरसं त्रिभुजं

१— २. 'रिषदा' ख. घ. ङ. पाठः। ३. 'व क्र' ख. च पाठः।

Shripuram Publications
www.shripuram.org

पिङ्गलं हरिसेनं च मबापीठस्य पूर्वादिदिशास्वधश्चोर्ध्वं च द्विठान्तैः स्वाहान्तैः स्वैराह्वयैर्नामभिः 'भूतिदाय स्वाहा' इत्याद्यैर्मन्त्रैर्यजतु। शाङ्गींशे भूतिदपूर्वान् शिवोक्तांश्चतुरः कुमुदादीन् विष्णूक्तांश्चतुरो यजतु।।३७, ३८।।

विवरणम्

दिशास्वधश्चोर्ध्वमिति। प्रागाद्यष्टपरिपीठिकासु कुमुदनैरृतभागे महापीठमध्यतश्चेत्यर्थः।।३७।।

द्विठान्तैः स्वैराह्वयैरिति[1]। यथा 'भूतिदाय स्वाह' इत्यादि। चतुरो भूतिदपूर्वानिति। सम्भूयाष्टौ प्रागादिपरिपीठिकास्विति भावः। नास्मिन्पक्षेऽधः पिङ्गलोपपत्तिः।।३८।।

द्वितयान् द्विशोऽखिलान् वा परितोऽधः पिङ्लं यजेदुपरि।
परमेष्ठीशपदाद्यं सेनमथायान्तुमन्त्रतश्चान्ते।।३९।।

विमर्शिनी

द्वितयान् शैवोक्तान् वैष्णवोक्तांश्चाखिलान् परितो द्विशः द्विद्विशो वा अधः पिङ्गलम् उपरि परमेष्ठीशपदाद्यं सेनं परमेष्ठीशसेनं च यजेत्। अन्ते 'आयान्तु पार्षदा' इति मन्त्रेण च यजेत्।।३९।।

विवरणम्

द्वितयानखिलान्वेति। भूतिदादीनष्टौ कुमुदादीनप्यष्टाविति। द्विश इति। प्राक्पीठिकायां भूतिदकुमुदौ दक्षवामयोरित्यादि। अस्मिन् पक्षे भेदमाह-अधः पिङ्गलमिति। पक्षद्वयेऽविशेषमाह-उपरि परमेष्ठीशपदाद्यं सेनमिति। परमेष्ठीशसेनमित्यर्थः। आयान्तु मन्त्रतश्चान्ते यजेदित्ययं हरिहरेऽपरो भेद इति।।३९।।

आयान्तु पार्षदाः सर्वे शाङ्करा वैष्णवास्तथा।
बलिपीठेऽत्र सन्तुष्टा निवसन्तु यथासुखम्।।४०।।
नमः सर्वपार्षदेभ्यो नम इति।
ब्रह्मसुपूर्वे घोष्यौ सयज्ञवेष्ट्यौ सुरङ्गिणी समुखी।
सुभुजा प्रमोदिनी पुनरात्मन्यपि कीर्तितान्तिमा ब्राह्मी।।४१।।

---

१. 'ति। परिपीठिकासु य' च पाठः।

Shripuram Publications
www.shripuram.org

एताः क्रमेण पूज्या दुर्गायां दिक्षु पीठमध्ये च।
ब्राह्म्यन्तेऽब्जदलस्थाः काल्याद्याश्चात्र पूजनीया वा।।४२।।

विमर्शिनी

दुर्गायाम् एताः क्रमेण दिक्षु पीठमध्ये च पूज्याः। कास्ताः, ब्रह्मसुपूर्वे घोष्यौ ब्रह्मघोषी सुघोषी च, सयज्ञवेष्ट्यौ यज्ञवेष्टी च, पुनः सुरङ्गिण्याद्याः। अन्तिमा अवसानभूता ब्राह्मी कीर्तिता। अत्र ब्राह्म्यन्ते ब्राह्म्या अवसाने समीपे वा अब्जदलस्थाः पीठपद्मस्य पूर्वादिदलेषु कालीकराल्याद्याः पूजनीया वा।।४१,४२।।

विवरणम्

ब्रह्मसुपूर्वे इति। यदुक्तं - 'ब्रह्मघोषी सुघोषी च यज्ञवेष्टी सुरङ्गिणी' इत्यादि।।४१।।

दिक्ष्विति। प्रागादिपरिपीठिकासु। ब्राह्म्यन्त इति। ब्राह्मीं महापीठे बलिनेष्ट्वा समापयेत्। यद्वा ब्राह्मीं तत्कर्णिकायामिष्ट्वा पुनः प्रागादितदीयदलेषु काल्याद्यष्टावपीष्ट्वा समापयेद्वेत्यर्थः।।४२।।

शूरोग्रशिखिजगत्पूर्वाश्च महाचण्डपूर्वकौ सेनाः।
क्रुद्धक्रूरजयत्स्कन्दाद्याश्च दशेशवत् स्कन्दे।।४३।।

अथवात्र भूतिदादीन् सपिङ्गलस्कन्दसेनपर्यन्तान्।
प्रयजेद् ये भूतादिग्रहादिकाभ्यामपीह बलिरिष्टः।।४४।।

ये भूताः स्कन्दसेनस्य पार्षदा बलिभोजिनः।
तृप्यन्तु ते मुदं यान्तु सद्भ्योऽसद्भ्यो नमो नमः।।४५।।

'ग्रहेभ्यः स्कन्दपार्षदेभ्यश्च सर्वेभ्यस्तेभ्यस्ताभ्यो नमो नमः' इति।

विमर्शिनी

स्कन्दे शूरोग्रशिखिजगत्पूर्वाः शूरादिपदाद्याः, महाचण्डपूर्वकौ महाचण्ड इत्याद्यौ च, क्रुद्धक्रूरजयत्स्कन्दाद्याः क्रुद्धादिशब्दाद्याः दश सेनाः ईशवत् पूर्वादिदशदिक्षु, अथवा अत्र स्कन्दे भूतिदादीन् सपिङ्गलस्कन्दसेनपर्यन्तान् शैववत् स्कन्दसेनान्तानेव पूजयेत्।

Shripuram Publications
www.shripuram.org

यथा पूर्वं बलिपीठप्रतिष्ठायां कृतं तथैवाधुनापि पूजयेदित्यर्थः। ये भूताः स्कन्दसेनस्य, 'ग्रहेभ्यः स्कन्दपारिषदेभ्यश्च' इति द्वाभ्यामपीह मध्ये बलिरिष्टः॥४३—४५॥

विवरणम्

शूरोग्रेति। शूरसेनोग्रसेनादय उक्ताः। ईशवदिति। जयत्सेनोऽधः। स्कन्दसेन उपरि महापीठ इति भावः॥४३॥

पिङ्गलेति। पिङ्गलोऽधः, उपरि स्कन्दसेनः। बलिरिष्ट इति। अयं स्कन्देऽपरो भेद इति भावः॥४४—४५॥

अथ गजवक्त्रगणेशौ विनायकश्चण्डविक्रमः क्रमशः।
विघ्नकरसर्पमेखलसशूर्पकर्णाख्यनागदन्त्यभिधाः॥४६॥
नवमोऽत्र रुद्रवक्त्रजनामा दशमस्तु विघ्नसेनाख्यः।
विघ्नेश्वरबलिपीठे दिक्ष्वध ऊद्र्ध्वं च पूजनीयाः स्युः॥४७॥

विमर्शिनी

अथ विघ्नेश्वरबलिपीठे गजवक्त्राद्याः क्रमशो दिक्ष्वध ऊर्ध्वं च पूजनीयाः स्युः। अत्र नवमो रुद्रवक्त्रजनामा। दशमस्तु विघ्नसेनाख्यश्च॥४६—४७॥

आर्ये द्वारघटोक्ता दिक्ष्वर्च्या वीरबाहुपूर्वाः स्युः।
भूतेशशास्तृसेनावध ऊर्ध्वमपीति पीठबलिक्लृप्तिः॥४८॥

विमर्शिनी

आर्ये दिक्षु वीरबाहुपूर्वाः द्वारघटोक्ताः, अध ऊर्ध्वं च भूतेशशास्तृसेनौ च पूजनीयाः स्युः। इति पीठबलिक्लृप्तिः महाबलिपीठस्थिता बलिक्लृप्तिः॥४८॥

देवग्रहादिबलिकर्मणि दिग्बलिं स्व-
मूलाणूना क्षिपतु पारिषदात्मनाथं[1]।
क्षिप्रप्रदक्षिणबलिं प्रविधाय शेषं
क्षेत्राधिपाय च समर्पयतूपहारैः॥४९॥

---

१. 'वा' क पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

देवग्रहादिबलिकर्मणि देवग्रहादि वा पितृग्रहादि वा[१] ग्रहाणां बलिकाले स्वमूलाणुना दिग्बलिं च क्षिपतु। अथ पारिषदात्मना 'विष्णुपारिषदेभ्यः सर्वेभ्यो भूतेभ्यो नमः' इत्यादिपरिषण्मत्रेण क्षिप्रप्रदक्षिणबलिम् अविच्छिन्नबलिं मूलपरिषण्मन्त्रावेकीकृत्य उभयत्र वा प्रविधाय शेषं हविरुपहारैः सह क्षेत्राधिपाय समर्पयतु। समर्पयत्वित्यनेनान्ते निवेदनमपि सूचितम्।।४९।।

विवरणम्

देवग्रहादिबलिकर्मणीति। प्रथमपटल एत उक्ताः। अत्र देवासुरेत्यादि तेषामग्र्यादिभाजां बलिः पुनः कार्यः। ततोऽष्टग्रहान् दिक्ष्विति ह्युक्तम्। तत्तद्बलिसमये तत्तद्दिशि मूलेन जलगन्धपुष्पान्वितेन हविषा सकृद्दिग्बलिश्च[२] कार्यः। अथ पारिषदात्मना क्षिप्रप्रदक्षिणबलिं प्रविधायेत्यन्वयः। "ग्रहान्ताद्वाग्रदेशाद्वा बलिं कृत्वाथ शेषतः। तत आरभ्य तन्निष्ठं परीयाद्विदधद् बलिम्" इति। 'विष्णुपारिषदेभ्यस्सर्वेभ्यो भूतेभ्यो नम' इत्येवमिह मनुरभिप्रेतः। सर्वान्ते क्षेत्रपाले संस्थानक्लृप्तिमुपदिशति-शेषमिति। हविश्शेषं पात्रे[३] शेषितमिति वार्थः। उपहारैरिति। पाद्यादिभिर्जलग-न्धादिभिर्बलिना निवेद्येन बलिमुद्रादिभिर्ब्रह्मार्पणेन चेति भावः। एवं तावत् सर्वेषु भूतबलिरुक्तः।।४९।।

उपस्थाय स्तोत्रैः प्रविकिरतु मन्त्रैर्निजनिजै-
र्यथान्यायं द्वाःस्थप्रभृतिदिगधीशान्तिमबलिम्।
दशस्वाशास्वाशाधिपपरिषदन्तेऽत्र मनुनों
नमो भूतेत्याद्येन च सकलदेवोत्सवबलौ।।५०।।

विमर्शिनी

अथोत्सवबलिविधानमाह-उपस्थायेति। सकलदेवोत्सवबलौ सकलानां देवानामुत्सवबलौ निजनिजैः स्तोत्रैस्तं तमुपस्थाय उपस्थानं कृत्वा निजनिजैर्मन्त्रैः 'ओं चण्डाय नमः' 'ओं प्रचण्डाय नमः' इत्यादिभिर्भूतबलावुक्तैर्मन्त्रैः द्वाःस्थप्रभृतिदिगधी-शान्तिमबलिं द्वाःस्थादिदिक्पालपर्यन्तं बलिं यथान्यायं भूतबलिन्यायेन प्रविकिरतु। अत्र दिक्पालबलौ दशस्वाशासु अग्रत आरभ्याष्टदिक्ष्वीशकोणे निरृतिकोणे च

---

१. 'वाग्रादिग्र' क. ख पाठः। २. 'कृद्बलि' क. च पाठः। ३. 'त्र' घ पाठः।

Shripuram Publications
www.shripuram.org

आशाधिपपरिषदन्ते दिक्पालानां तत्तत्पारिषदानां चान्ते 'ओं नमो भूतेभ्य' इत्याद्येन मनुना च बलिं किरतु।।५०।।

विवरणम्

अथोत्सवबलिरुच्यते—उपस्थाय स्तोत्रैरिति। यथान्यायमिति। भूतबल्युक्तन्यायेन। किन्तु पद्मे तत्तद्देवताभावनानन्तरं तत्तत्स्तोत्रैरुपस्थाय पाद्यार्घ्यादिसमर्पणादिकमित्येव विशेषः। दिगीशबलिसमये त्वन्यो[1] विशेषः। तदाहदशस्विति। ओं नमो भूतेभ्य[2] इत्याद्येन मनुनेति। बलिं प्रविकिरत्वित्याकृष्यते।।५०।।

पूर्वस्यां[3] दिशि पूर्वकेण च नमो भूतादिमन्त्रान्ततो
दिग्दिक्ष्वीशगणेशवह्निभुवि ये भूतादिमन्त्रेण च।
ओजाशासु बलिं करोतु हरिवर्जं सर्वतो वा तथा
शर्वे प्रागमृतांशुपूजनविधेरर्च्यश्च वित्ताधिपः।।५१।।

विमर्शिनी

ईशगणेशवह्निभुवि शिवगणपतिस्कन्देषु नमो भूतादिमन्त्रान्ततः 'ओं नमो भूतेभ्य' इत्यादिमन्त्रेण बलिदानानन्तरं दिग्दिक्षु दशदिक्ष्वपि पूर्वस्यां दिशि पूर्वकेण 'ओं पूर्वस्यां दिशि शिवस्ये'त्यादिना बलिं करोतु। ओजाशासु पूर्वदक्षिणपश्चिमोत्तरोर्ध्वदिक्षु ये भूतादिमन्त्रेण 'ये भूताःपुरस्सद' इत्यादिना मन्त्रेण च बलिं करोतु। हरिवर्जं हरिं वर्जयित्वा सर्वतः सर्वदेवेषु तथा वा। शर्वे अमृतांशुपूजनविधेः सोमाराधनात् प्राग् वित्ताधिपो वैश्रवणोऽर्च्यश्च।।५१।।

विवरणम्

विशेषान्तरमप्याह—पूर्वस्यामिति। पूर्वकेणेति। ओजाशासु ये भूतादिमन्त्रेण चेत्यन्वयः। एतदुक्तं भवति। दिगीशबलाविन्द्रतत्पारिषदबलिं कृत्वा तद्बहिः 'ओं नमो भूतेभ्य' इति तद्बहिः 'ओं पूर्वस्यां दिशि'ति तद् बहिश्च 'ये भूताः पुरस्सद' इति च मालामन्त्रैः क्रमेण बलिं दद्यात्। दशदिक्ष्वप्येवम्। किन्तु ये भूता इत्यनेन प्राग्याम्यपश्चिमोदगुपरि दिक्ष्वेव बलिं दद्यादिति। हरिवर्जं सर्वतो वा तथेति। शिवस्कन्दगणपतिष्वयमेकः प्रकारः। हरावपरः प्रकारः[4]। वक्ष्यति च-'विष्णौ दिग्गणमन्त्रत'

---

१. 'त्वस्त्यन्यो'। २. 'ताद्ये' ख. च पाठः। ३. 'स्यामिति पू' इति मूलकोशपाठः। ४. 'रः। व' च पाठः।

Shripuram Publications
www.shripuram.org

इति, 'ये भूतादिपुरःप्रभृत्युपरिनिष्ठैरि'ति च। हरिहरे दुर्गायां शास्तरि चोभयथापि[१] विकल्पः। वक्ष्यति च-यत्रान्तः शिववदित्यादि। शर्वे प्रागिति भूतबलौ तु शिवेऽपि विकल्प उक्तः। षण्मुखार्थाधिभू इति सोमानन्तरमेव वार्हतु धनाध्यक्षमिति च। इह तु नियमान्तरमुक्तमिति बोद्धव्यम्। 'पीठे श्रीदो दिशाहोमे सोमो वा स्थापितो भवेत्। स्थापितस्य स्वपीठे स्याद् बलिरन्यस्य भूतले'। इति।।५१।।

यथान्यायं मातृप्रभृतिगुहनिष्ठावृतिमथो
यजेद् गायत्र्याद्यैर्मनुभिरपि सर्वेषु विधिवत्।
इमां प्रागाद्याशापरिगतकुमारादिसहितां
त्रिधामन्येवं वा सहरिहरसुम्भासुररिपौ।।५२।।

विमर्शिनी

अथो सर्वेषु देवेषु मातृप्रभृतिगुहनिष्ठावृतिं मातृशास्तृदुर्गास्कन्दान् यथान्यायं न्यायाविरोधेन गायत्र्याद्यैर्वक्ष्यमाणैर्मनुभिरपि विधिवद् यजेत्। त्रिधामनि विष्णौ इमामावृतिं प्रागाद्याशापरिगतकुमारादिसहितां प्रागाद्याशासु स्थितस्कन्दाद्यावरणसहितां यजेत्। सहरिहरसुम्भासुररिपौ शिवनारायणे दुर्गायामप्येवं वा यजेत्।।५२।।

विवरणम्

यथान्यायमिति। पूर्ववत् गायत्र्याद्यैर्मनुभिरपीत्यत्रैव विशेषसमुच्चयः। इमामिति। उक्तामावृतिम्। त्रिधामनीति। यजेदिति सम्बध्यते। अयमाशयः शिवादिषु मात्रादिस्कन्दान्ततयार्धावृतिरियं भवति। विष्ण्वादिषु तु स्कन्दादीशान्ततया सर्वावृतिरिति। शास्तरि त्वर्थाच्छिववदेवेति लभ्यते।।५२।।

प्राचि स्कन्दं प्रभेशं शिखिनि पितृपतौ धर्ममातॄस्तथार्यं
भृङ्गे भानुं पितृस्थं द्रुहिणमुदकराजीरणे सूकरार्ये।
स्कन्दं मुख्येऽन्यमातॄरपि तुहिनरुचावम्बिकां त्र्यम्बकं स्वे
कोणे चार्हेत् परीत्यार्चयतु पुनरुदित्यां च निर्माल्यभाजम्।।५३।।

---

१. 'था वि' च पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

स्कन्दाद्यावृतिमाह—प्राचीति। प्राचि इन्द्रस्य बहिर्भागे स्कन्दमर्हेत्। शिखिनि अग्नेः बहिः प्रभेशं शास्तारं, पितृपतौ यमस्य दक्षिणे धर्ममातृः धर्मं मातृश्च, तथा भृङ्गे यमनिर्ऋत्योरन्तराले आर्यं, पितृस्थं निर्ऋतिस्थं भानुं सूर्यम्, उदकराजि वरुणे द्रुहिणं ब्रह्माणम्, ईरणे वायौ सूकरार्ये वराहं दुर्गां च, मुख्ये स्कन्दं, तुहिनरुचौ सोमे अन्यमातृः उत्तरमातृः[1] अम्बिकामपि, त्र्यम्बकं शिवं स्वे कोणे च, पुनः परीत्य परिक्रम्य उदित्याम्[2] ईशपश्चिमे निर्माल्यभाजं चार्चयतु।।५३।।

विविरणम्

अथामुं स्कन्दाद्यावरणं वदन् पक्षद्वयेऽप्यावरणक्लृप्तिं दर्शयति—प्राचि स्कन्दमिति। तथार्यं भृङ्ग इति वाक्यम्। द्रुहिणमुदकराजीति च वरुणे ब्रह्माणमित्यर्थः। ईरणे सूकरार्ये इति। वायौ वराहं दुर्गाञ्चेत्यर्थः। स्कन्दं मुख्ये। अन्यमातृरपीति उत्तरमातृग्रहणम्। स्कन्दं मुख्ये पूजयित्वा तत्पूर्वत उत्तरमातृः पूजयेदिति। तुहिनरुचावम्बिकामिति वाक्यम्। स्वे केण इति। ऐशदिशि। परीत्यार्चयत्विति। स्कन्दाद्यावरणसद्भाव एवायं नियमः। मात्रादिस्कन्दान्तावृतियोगे तु तदनन्तरमेवोदितौ निर्माल्यभुगिज्यत इति। किञ्च स्कन्दाद्यावरणं प्राङ्मुखे प्रत्यङ्मुखे च देवे प्रागाद्येव भवति। नाग्र्यदिगादीत्यप्यवधार्यमिति।।५३।।

नमस्ते द्वारपालाय चण्डायामिततेजसे।
नरसिंहतनूजाय चक्रेणाङ्कितमौलये।।५४।।

नमस्ते द्वारपालाय प्रचण्डायामितौजसे।
नरसिंहतनूजाय शङ्खेनाङ्कितमौलये।।५५।।

वाहनाय महाविष्णोस्ताक्ष्यायामिततेजसे।
गरुडाय नमस्तेऽस्तु दुष्टसर्पेन्द्रमृत्यवे।।५६।।

शय्या यो जगतां धातुर्विष्णोर्विविधमायिनः।
अनन्ताय नमस्तुभ्यमहीन्द्रनमिताङ्घ्रये।।५७।।

---

१. 'म' घ. च पाठः। २. 'दु' क पाठः।

Shripuram Publications
www.shripuram.org

नमस्ते सर्वभूतेश! सर्वसम्पत्प्रदायिने।
सर्वविघ्नविनाशाय विघ्नेशाय शिवात्मने।।५८।।

नमस्तेऽस्तु महायोगिन्! व्याख्यामुद्रालसत्कर!।
दक्षिणामूर्तिरूपाय रुद्राय परमात्मने।।५९।।

नमस्ते द्वारपालाय चक्रव्यग्रमहाभुज!।
दृष्ट्या निहतदैत्याय वैष्णवाय नमो नमः।।६०।।

नमस्ते द्वारपालाय शङ्खव्यग्रमहाभुज!।
दृष्ट्या निहतदैत्याय वैष्णवाय नमो नमः।।६१।।

दैत्यदर्पविनाशाय सहस्राक्षाय धीमते।
कुलिशव्यग्रहस्ताय नमस्तेऽस्तु शतक्रतो!।।६२।।

मुखं यः सर्वदेवानां येन हव्यं च नीयते।
येन प्रवर्तते सर्वं नमस्तस्मै हविर्भुजे।।६३।।

येन संह्रीयते सर्वं येन धर्मं च रक्ष्यते।
यस्माद् बिभेति लोकोऽयं प्रेतनाथ! नमोऽस्तु ते।।६४।।

राक्षसा यातुधानाश्च पिशाचाश्चाश्रयन्ति यम्।
तस्मै निर्ऋतिरूपाय रक्षसां पतये नमः।।६५।।

येन संरक्ष्यते सर्वं यस्मिन् सर्वं प्रतिष्ठितम्।
अमोघपाशहस्ताय तस्मैऽपांपतये नमः।।६६।।

पूर्यन्ते च ह्रीयन्ते च येन प्राणादयः क्रमात्।
भूतानां पतये नित्यं नमस्तस्मै मरुत्पते!।।६७।।

यं प्राश्यामरतां यान्ति देवा यज्ञशरीरिणः।
सोमाय गदिने तस्मै ज्योतिषां पतये नमः।।६८।।

यत्प्रसादाज्जगत् सर्वं धनेन परिपूर्यते।

Shripuram Publications
www.shripuram.org

यक्षगुह्यकनाथाय धननाथ! नमोऽस्तु ते।।६९।।

येन कालाग्निना लोको युगान्तेष्ववदह्यते।
तस्मै ते ब्रह्मणः पुत्र! विरूपाक्ष! नमोऽस्तु ते।।७०।।

येन सृष्टं जगत् सर्वं सर्गादौ विष्णुशासनात्।
पितामह! नमस्तुभ्यं सर्वलोकेश! पद्मज!।।७१।।

पन्नगाधिपतिर्देव! अनन्तो नाम नामतः।
पातालवासिने नित्यं नागराज! नमोऽस्तु ते।।७२।।

वीरभद्र! नमस्तेऽस्तु नमो विघ्नेश्वराय च।
ब्राह्म्यादिभ्यश्च[१] मातृभ्यः सर्वाभ्यो वै नमो नमः।।७३।।

श्रीधराय नमस्तेऽस्तु नमस्तेऽश्वमुखाय च।
वागीश्वर्यादिमातृभ्यः सर्वाभ्यो वै नमो नमः।।७४।।

विष्वक्सेन! नमस्तेऽस्तु देवनिर्माल्यधारिणे।
शङ्खचक्रगदापाणे! महापारिषदेश्वर!।।७५।।

विमर्शिनी

'उपस्थाय स्तोत्रैरि'त्याद्युक्तमुत्सवबलिं विवृण्वन् पूर्वमुपस्थानमन्त्रान् क्रमेण पठति —नमस्ते द्वारपालायेत्यादि। अत्र केषाञ्चित् प्रधानानामेवोपस्थानमन्त्रा भवन्ति। इतरेषां तु स्वस्वनाममन्त्रा एवोपस्थाने प्रयोज्या इत्यवगन्तव्यम्।।५४-७५।।

विवरणम्

इदानी'मुपस्थाय स्तोत्रै'रित्युद्दिष्टानि स्तोत्राणि वदन् प्रथमं तावद्विष्णावाहन-मस्ते द्वारपालायेति। शास्तृदुर्गास्कन्दानामितरेषाञ्च स्कन्दप्रभेशादीनां स्तोत्राभाव इति।।५४-७५।।

एते हरावुपस्थानमन्त्रास्तत्र शिवादिषु।
साधारणास्त एव स्युर्विशेषोक्तान् पृथग् ब्रुवे।।७६।।

---

१. 'श्च सर्वाभ्यो मातृभ्यो वै' ख. ग. पाठः।

Shripuram Publications
www.shripuram.org

नमस्ते द्वारि युक्ताय शूलहस्ताय धीमते।
दृष्ट्या निहतदैत्याय शाङ्कराय नमो नमः।।७७।।

नमस्ते द्वारि युक्ताय परशुव्यग्रपाणये।
दृष्ट्या निहतदैत्याय शाङ्कराय नमो नमः।।७७।।

नमस्ते द्वारि युक्ताय परशुव्यग्रपाणये।
दृष्ट्या निहतदैत्याय शाङ्कराय नमो नमः।।७८।।

येन प्रसूयते सर्वं यस्मिन् सर्वं प्रलीयते।
अमोघपाशहस्ताय तस्मैऽपांपतये नमः।।७९।।

वाहनाय महाशम्भोः शैलार्णवघनस्वन!।
ऋषभाय नमस्तुभ्यं सर्वदुष्टप्रशान्तये।।८०।।

नमस्ते द्वारि युक्ताय शूलहस्ताय धीमते।
दृष्ट्या निहतजैत्याय शाङ्कराय नमो नमः।।८१।।

नमस्ते द्वारपालाय चण्डायामितौजसे।
नरसिंहतनूजायै चक्रेणाङ्कितमौलये।।८२।।

नमस्ते द्वारि युक्तायै चण्ड्यै खेटासिधारिणी!।
नरसिंहतनूजायै चक्रेणाङ्कितमौलये।।८३।।

नमस्ते द्वारि युक्तायै अम्बिकायै महौजसे।
नरसिंहतनूजायै शङ्खेनाङ्कितमौलये।।८४।।

नमस्ते द्वारि युक्तायै जयायै ज्वालयावृते!।
दृष्ट्या निहतदैत्यायै कात्यायन्यै नमो नमः।।८५।।

नमस्ते द्वारि युक्तायै विजयायै महौजसे।
दृष्ट्या निहतदैत्यायै कात्यायन्यै नमो नमः।।८६।।

---

१. 'वानत्र' क. घ पाठः। २. 'तु' ख पाठः। ३. 'रसाय' ग पाठः

www.shripuram.org
Shripuram Publications
www.shripuram.org

वाहनाय महादेव्याः सिंहायामिततेजसे।
अतुल्यबलवन्नत्र[1] नमस्तेऽस्तु हरीश्वर!।।८७।।

दैत्यदर्पविनाशाय सहस्राक्षाय धीमते!।
कुलिशव्यग्रहस्ताय नमस्तेऽस्तु शतक्रतो!।।८८।।

मुखं यः सर्वदेवानां येन हव्यं च नीयते।
येन प्रवर्तते सर्वं नमस्तेऽस्मै हविर्भुजे।।८९।।

दण्डहस्ताय भीमाय सर्वप्राणहराय च।
प्रेतनाथ! नमस्तेऽस्तुपितृलोकनिवासिने।।९०।।

खड्गहस्ताय घोराय नैर्ऋताय महामते!।
रक्षोधिपाय तीक्ष्णाय नमस्तेऽस्तु निशाचर!।।९१।।

जलाधिपाय प्राणाय सर्वभूतहिताय च।
पाशहस्ताय भीमाय नमस्तेऽस्तु अपांपते!।।९२।।

सदागताय प्राणाय सर्वभूतहिताय च।
ध्वजहस्ताय शब्दाय नमस्तेऽस्तु समीरण!।।९३।।

नक्षत्राणां च[2] सर्वेषां सोमो राजा प्रकीर्तितः।
गदापट्टसधारी च सोमराजाय ते नमः।।९४।।

धनदाय कुबेराय सर्वौषधिं[3]धराय च।
पौलस्त्याय च नीलाय नमस्तेऽस्तु धनाधिप!।।९५।।

ईशानः सर्वविद्यानामक्षमालाधरो हरः।
हरिणहस्तो महात्मा च नमस्तेऽस्तु हरिप्रिय!।।९६।।

स्रष्टा चरस्य सर्वस्य लोकानां च पितामहः।
आदिश्च सर्वभूतानां तस्मै वेदात्मने नमः।।९७।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

पन्नगाधिपतिर्देव! अनन्तो नाम नामतः।
पातालवासिने नित्यं नागराजाय ते नमः॥९८॥

तर्जयन्ती जगत् सर्वं सदा निर्माल्यधारिणि!।
वरदाभयहस्तायै चण्डिकायै नमोऽस्तु ते॥९९॥

इन्द्रः सुरपतिश्चैव वज्रहस्तो महाबलः।
शतयागाधिपो देवस्तस्मै यागात्मने नमः॥१००॥

सर्वदेवमयो देवो रक्षोवह्निर्महाबलः।
सप्तजिह्वो महावीर्यो नमो वैश्वानराय च॥१०१॥

[1]दण्डहस्तो महादेवो धर्माध्यक्षो महाबलः।
आवाहये [2]धर्म[3]राज! तस्मै प्रेतात्मने नमः॥१०२॥

खड्गहस्तधरो देवो नैर्ऋतो[4] नीलविग्रहः।
निर्ऋते! च नमस्तुभ्यं खड्गहस्तात्मने नमः॥१०३॥

जलराज! महाराज! विख्यात इति निम्नगः।
पश्चिमां दिशमाचष्टे पाशहस्तात्मने नमः॥१०४॥

सर्वप्रकाशको नित्यः सर्वलोकाधिदेवता।
ध्वजहस्तो महाप्राणस्तस्मै वाय्वात्मने नमः॥१०५॥

नक्षत्राणां च सर्वेषां सोमो राजा प्रकीर्तितः।
गदापट्टसधारी च सोमराजाय ते नमः॥१०६॥

सर्वलोकाधिपो देव ईशानो नाम नामतः।
शूलपाणिर्महादेव! त्रैलोक्याधिपते! नमः॥१०७॥

स्रष्टा चरस्य सर्वस्य लोकानां च पितामहः।
आदिश्च सर्वभूतानां तस्मै वेदात्मने नमः॥१०८॥

---

१. 'च' क पाठः। २. 'ध्व' ग. घ पाठः। ३. 'जं' ख. ग. घ पाठः। ४. 'त्यो' ख. ग. घ पाठः।

Shripuram Publications
www.shripuram.org
www.shripuram.org

पन्नगाधिपतिर्देव! अनन्तो नाम नामतः।
पातालवासिने नित्यं नागराजाय ते नमः॥१०९॥

वाहनाय गणेशस्य महाचाषाय धीमते।
मध्ये पारिषदेशानां भ्राजमानाय वै नमः॥११०॥

विमर्शिनी

हरौ एते द्वाःस्थादिनिर्माल्यधार्यन्तेषूपस्थानमन्त्राः स्युः। शिवादिषु तत्र उक्तेषु मन्त्रेषु साधारणाः केचित् त एव। विशेषोक्तान् विशेषत उक्तान् पृथग् ब्रुवे॥७६ ११०॥

विवरणम्

शिवे भेदमाह—नमस्ते द्वारियुक्तायेति। नन्दिमहाकाळयोः स्तोत्राभावः। कश्चित्तयोरपि स्तोत्रमाह—

''नमस्ते द्वारि युक्ताय शूलहस्ताय धीमते।
दृष्ट्या निहतदैत्याय नन्दीशाय नमो नमः॥
नमस्ते द्वारि युक्ताय परशुव्यग्रपाणये।
दृष्ट्या निहतदैत्याय महाकाळाय ते[1] नमः॥''

इति। सोमे 'यं प्राश्यामरतां यान्ती'ति। यद्वा स्तोत्रान्तरम्—
''नक्षत्राणां च सर्वेषां सोमो राजा प्रकीर्तितः।
गदापट्टसधारी च सोमरजाय ते नमः॥''

इति। हरिहरे भेदमाह—नमस्ते द्वारि युक्तायेति। वाहने तु स्तोत्रद्वयं योज्यम्॥ ७६-८२॥

दुर्गायां भेदमाह—**नमस्ते द्वारियुक्तायै** इति॥८३-९९॥

स्कन्दे भेदमाह—**इन्द्रस्सुरपतिश्चैवेति**॥१००-१०९॥

गणपतौ भेदमाह—**वाहनाय गणेशस्येति**। शास्तरि न भेद इति॥११०॥

एवं गिरीशशाङ्गींशदुर्गास्कन्दादिषूदिताः।
द्वाःस्थवाहनदिक्पादिस्तुतिमन्त्रा विशेषिताः॥१११॥

---

१. 'वै' ख. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

एवमुक्तप्रकारेण गिरीशशाङ्गींशदुर्गास्कन्दादिषु, आदिशब्देन विघ्नो गृह्यते, द्वाःस्थवाहनदिक्पादिस्तुतिमन्त्राः द्वाःस्थादीनाम् उपस्थानमन्त्रा ये ये विशेषितास्ते ते उदिता उक्ताः।।१११।।

विवरणम्

स्तोत्रप्रकरणमुपसंहरति—एवमिति। विष्णौ तावत्सर्वेऽपि स्तोत्रमन्त्रा निगदिताः। शिवादिषु तु विशेषिता भेदवन्तस्तुतिमन्त्रा उक्ताः। ते च यथायोगानां द्वास्थादीनां स्युः। विशेषाणान्तु विष्णूक्ता एव सामान्यरूपा ग्राह्या इति।।१११।।

ताराद्यं निजनाम ङेन्तमथ विष्ण्वादीष्टदेवाक्षर-
प्रोद्यत्पारिषदाक्षरं सह चतुर्थ्या हार्दहृद्यं वदेत्।
एवं स्यात् परिवारदैवतमनूनां लक्षणं तत्पद-
प्रोद्यत्पारिषदेभ्य एष परिषन्मन्त्रो नमोऽन्तः स्मृतः।।११२।।

विमर्शिनी

उपस्थानमन्त्रान् पठित्वा स्वस्वमन्त्रानाह—ताराद्यमिति। ताराद्यम् आदौ तारविशिष्टं ङेन्तं चतुर्थ्येकवचनान्तं च निजनाम स्वस्वनाम 'ओं चण्डाये'त्यादि। अथानन्तरं विष्ण्वादीष्टदेवाक्षरप्रोद्यत्पारिषदाक्षरं विष्ण्वादीनां तत्तदिष्टानां देवानां वाचके प्रोद्यत् प्रकर्षणोद्गच्छत् पारिषद इत्यक्षरं, तत् पुनश्चतुर्थ्या विभक्त्या सह हार्दहृद्यं नमसा युक्तं वदेत्। 'ओं चण्डाय विष्णु पारिषदे नमः'। एवं परिवारदैवतमनूनां परिवारदेवता-मन्त्राणां लक्षणं स्यात्। तत्पदप्रोद्यत्पारिषदेभ्यः, तत्पदेन चण्डादिपरिवारदैवतनामोच्यते, 'चण्डपारिषदेभ्य' इत्यादि। अथवा तदित्ये(व?तत्)पदानन्तरं पारिषदेभ्य इति तत्पारिषदेभ्यः। एष परिषन्मन्त्रो नमोऽन्तश्च स्मृतः 'तत्पारिषदेभ्यो नम' इति। एतत् परिवारमन्त्रलक्षणं भूतबल्यादावपि सर्वत्र समानम्।।११२।।

विवरणम्

इदानीं द्वाःस्थादीनां प्रधानपरिवाराणां पूजाद्यार्थतया नाममन्त्रं लक्षणेनाह ताराद्यमिति। निजनामेति तत्तत्परिवारनाम। विष्ण्वादीष्टदेवाक्षरेति। विष्णुपारिषदे

Shripuram Publications
www.shripuram.org

रुद्रपारिषदे इत्यादि। प्रधानानां परिषन्मन्त्रमप्याह-तत्पदादिति। तदित्यस्मादेव पदाद्यथा 'तत्पारिषदेभ्यो नमः' इति। यद्वा तत्पदादिति तच्छब्देन प्रधानदेवताग्रहणम्। यथा 'चण्डपारिषदेभ्यो नमः'। 'नन्दिपारिषदेभ्यो नमः'।।११२।।

यद्यन्तर्द्वारमधिकौ श्रीशेऽत्रानन्दनन्दनौ।
द्वाःस्थौ जया च विजया[1] तथैव महिषद्विषि[2]।।११३।।

विमर्शिनी

श्रीशेऽन्तर्द्वारं भवति यदि अत्रान्तर्द्वारे आनन्दनन्दनौ द्वाःस्थौ अधिकौ पूर्वोक्तादधिकौ। महिषद्विषि तथा यदि, अन्तश्चण्डिकाम्बिके बहिश्च जया च विजया च भवतः।।११३।।

स्फुर स्फोटय हुं त्र्यक्ष स्वाहा नन्दिमनुः शिवे।
प्रों कपालिन् ह इत्येष महाकालमनुर्हृदा।।११४।।

विमर्शिनी

शिवे 'स्फुर स्फोटय हुं त्र्यक्ष स्वाहा' इति नन्दिमनुः। हृदा नमसा सहितः 'प्रों कपालिन् ह' इति महाकालमनुः। अनयोर्मन्त्रानन्तरं नाममन्त्राभ्यामपि बलिदानं कार्यम्।।११४।।

विवरणम्

शिवे नन्दिमहाकालयोर्मूलमन्त्रोऽप्यस्तीत्याह-स्फुरेति। हृदेति। नमोऽन्त इति भावः।।११४।।

गरुडमनुस्तारादिस्वाहान्तः पक्षिराजाय।
गरुडाय वैनतेयायेत्यपि नत्याथ तस्य गायत्री।।११५।।
'वैनतेयाय विद्महे पक्षिराजाय धीमहे*। तन्नो गरुडः प्रचोदयात्।'

विमर्शिनी

तारादिस्वाहान्तः पक्षिराजायेति गरुडमनुः। नत्या नमसा सह गरुडाय वैनतेयायेति द्वावपि। अथ तस्य गायत्री, लिख्यत इति शेषः।।११५।।

---

१. 'बहिश्च म'। २. 'षि। कुमारे सुकुमारश्च भद्रसेनश्च कीर्तितौ। स्फु' ग पाठः।
* 'धीमहि' इत्येव प्रसिद्धो गायत्र्यां पाठः। 'धीमहे' इति तु अत्रोपरिष्टाच्च पठ्यते।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

विष्णौ वाहनस्य मूलनाममन्त्रगायत्रीराह—**गरुडमनुरिति**।।११५।।

सिंहस्य वज्रनखदंष्ट्रायुधायपदान्ततः।
महासिंहाय हूं नत्या मनुरेवं समीरितः।।११६।।

विमर्शिनी

वज्रनखदंष्ट्रायुधायपदान्ततः 'ओं वज्रनखदंष्ट्रायुधाय' इति पदान्ते 'महासिंहाय हूं' इति नत्या च वदेत्। एवं सिहस्य मनुः समीरितः।।११६।।

विवरणम्

सिंहस्येति। प्रागुक्तसमष्टिमनुरेवायमिति।।११६।।

विष्णवादिदेवनाम्नः पुरतस्तु सुरादिजातिनामाद्यम्।
अधिपतयेपदमत्र प्रयोज्यमिन्द्रादिदिक्पमन्त्रेषु।।११७।।

विमर्शिनी

दिक्पालमन्त्रलक्षणमाह—विष्णवादीति। अत्र इन्द्रादिदिक्पमन्त्रेषु विष्णवादि-देवनाम्नः पुरतः पूर्वं तु सुरादिजातिनामाद्यं सुरतेज इत्यादीनां जातीनां नामाद्यं[1] यथा भवति तथाधिपतयेपदं प्रयोज्यं स्यात्। 'ओं इन्द्राय सुराधिपतये विष्णुपारिषदे नमः' इत्यादयो मन्त्रा इत्यर्थः।।११७।।

विवरणम्

दिक्पालमन्त्रेषु विशेषमधिकमाह—**विष्णवादिदेवनाम्न** इति।।११७।।

सुरतेजःप्रेताख्या रक्षांसि तथा जलानि च प्राणाः।
नक्षत्राण्यपि विद्या लोका नागाश्च जातयोऽत्र दश।।११८।।

'ओं नमो भूतेभ्यो भूतकृद्भ्यः सर्वेभ्योऽरिष्टकृद्भ्यः सद्भ्योऽसद्भ्यः सदसद्भयः सर्वगणेभ्यो नमो नमः स्वाहा'।।

'पूर्वस्यां दिशि हरेर्भगवतो ये गणा वज्रपाणयः श्वेताः श्वेताक्षाः

---

१. 'नाम्नामा' क, 'नाम्नाद्य' च पाठः।

Shripuram Publications
www.shripuram.org

श्वेतलोहिता दिव्यन्तरिक्षभौमाः पातालनिवासिनश्च तेभ्यो वै नमो नमः स्वाहा'॥

विमर्शिनी

जातीराह—सुरेति। सुरतेजःप्रेताख्याः सुरतेजःप्रेतेति तिस्र आख्याः रक्षांसि जलानि प्राणाः नक्षत्राणि विद्याः लोकाः नागश्चेति अत्र दश जातयः स्युः॥११८॥

पुनः 'ओं नमो भूतेभ्यः' इत्याद्युक्तान् मन्त्रान् पठति—पूर्वस्यां दिशीत्यादि॥

प्राचीत्यणुरिहान्यत्राशास्त्रवर्णपदे क्रमात्।
आग्नेय्यां शक्तिरक्ते च याम्यायां दण्डसंयुतम्॥११९॥

कृष्णं तथैव नैर्ऋत्यां खड्गं श्यामसमन्वितम्।
वारुण्यां पाशशबले वायव्यां पुनरङ्कुशम्॥१२०॥

पीतं तथैव सौम्यायां गदां सितसमन्विताम्।
ऐशान्यां शूलकपिले तूर्ध्वायां पद्मसूक्ष्मके॥१२१॥

अधस्ताद् विषधूम्रे च योजयेन्मन्त्रवित्तमः।
हरिस्थानेऽन्यदेवेषु शिवादिस्वस्वनाम च॥१२२॥

'ये भूताः पुरस्सदो निशाचरा रौद्राः सन्तोऽसन्तः सदसन्तो विरूपा विश्वरूपा महारूपा घोररूपा मृगास्या विहगाननाः पुष्टिकृतोऽपुष्टिकृतः कामदाश्च बलिमिच्छन्ति, तेषां सर्वेषां बलिं हरामि महद्भ्यः क्षुद्रकेभ्यश्च [१]तेभ्यो नमो नमः स्वाहा'॥

इति।

विमर्शिनी

मन्त्रे दिगादिविशेषयोजनप्रकारमाह—प्राचीति। प्राचि पूर्वदिग्भागे इत्यणुः। अन्यत्र अग्न्यादौ इह आशास्त्रवर्णपदे दिशामायुधानां वर्णानां पदेषु स्थानेषु क्रमान्मन्त्रवित्तम एतानि पदानि योजयेत्। तानि क्रमेणाह—आग्नेय्यामित्यादि—आग्नेय्यां शक्तिरक्ते च 'आग्नेय्यां दिशि हरेर्भगवतो ये गणाः शक्तिपाणयः रक्ता रक्ताक्षाः' इत्यादि।

१. 'तेभ्यस्ताभ्यो' ख. ग पाठः।

Shripuram Publications
www.shripuram.org

याम्यायांदण्डसंयुतं कृष्णं 'याम्यायां दिशि हरेर्भगवतो ये गणा दण्डपाणयः कृष्णाः' इत्यादि। नैर्ऋत्यां खड्गं श्यामसमन्वितं 'नैर्ऋत्यां खड्गपाणयः श्यामाः'। वारुण्यां पाशशबले 'वारुण्यां पाशपाणयः शबलाः'। वायव्यां पुनरङ्कुशं पीतं 'वायव्याम् अङ्कुशपाणयः पीताः'। तथैव सौम्यायां गदां सितसमन्वितां 'सौम्यायां गदापाणयः सिताः'। ऐशान्यां शूलकपिले 'ऐशान्यां शूलपाणयः कपिलाः'। ऊर्ध्वायां पद्मसूक्ष्मके 'ऊर्ध्वायां पद्मपाणयः सूक्ष्माः'। अधस्ताद् विषधूम्रे च 'अधस्ताद् दिशि हरेर्भगवतो ये गणा विषपाणयः धूम्रा धूम्राक्षाः' इत्यादीत्यर्थः। अन्यदेवेषु हरिस्थाने हरेरित्यस्य स्थाने स्वस्वनाम योजयेत्। 'पूर्वस्यां दिशि शिवस्य भगवतो ये गणा वज्रपाणयः श्वेताः श्वेताक्षाः' इत्यादीत्यर्थः।।११९-१२२।।

तृतीयं मालामन्त्रमाह—ये भूता इति।।

विवरणम्

प्राचीत्यणुरिति। प्राच्यां दिश्येवम्। पूर्वस्यां दिशीत्ययं मालामनुरित्यर्थः। अन्यत्रेति। आग्नेय्यादिदिक्षु। आशास्त्रवर्णपदे इति। पूर्वस्यां दिशि वज्रपाणयश्चैता इति दिगायुधवर्णानां स्थाने एतानि वक्ष्यमाणानि योजयेदिति भावः।।११९।।

मन्त्रवित्तम इति।।१२२।।

प्राचीत्यणुर्दक्षिणपश्चिमोत्तरो-
पर्यक्षराण्योजदिशास्वतोऽन्यतः।
पुरःपदेऽग्न्यादिविदिक्पनाम च
क्रमान्नवाशासु यदीह योजयेत्।।१२३।।

विमर्शिनी

इति प्राचि भागे अणुः। अतोऽन्यतः ओजदिशासु[1] अयुग्मदिक्षु पुरःपदे पुर इत्यस्य[2] स्थाने दक्षिणपश्चिमोत्तरोपर्यक्षराणि दक्षिण-पश्चिम-उत्तर-उपरीति पदानि क्रमाद् योजयेते। 'ये (देवा ? भूता) दक्षिणसदः' इत्यादि। नवाशासु यदि विष्ण्वादौ कुहचिद् बहिर्बलिकाले बलिपीठबाह्यतो नवाशासु अतोऽन्यतः कोणेषु पुरःपदे क्रमाद् अग्न्यादिविदिक्पनाम च अग्न्यादिकोणपालानां नाम च योजयेत्। 'ये (देवा ? भूता)

१. 'जाशा' ख पाठः। २. 'त्युपस्था' क. 'त्युक्तस्था' ङ पाठः।

Shripuram Publications
www.shripuram.org

अग्निसदः’ इत्यादि ।।१२३।।

विवरणम्

प्राचीत्यणुरिति। ओजदिशासु यद्यतोऽन्यतः दक्षिणपश्चिमोत्तरोपर्यक्षराणि पुरःपदे योजयेदित्यन्वयः। यथा ‘ये भूता दक्षिणसद’ इत्यादि नवाशासु यद्यग्न्यादिविदिक्पनाम च योजयेदिति। विदिक्ष्विति ज्ञेयम्। अतोऽन्यत इति सामान्येन ह्युक्तम्। यथा ‘ये भूता अग्निसदः’, ‘ये भूता निर्ऋतिसदः’ इत्यादि ।।१२३।।

ऋषभायेति नमोऽन्तो महाबलायाथ सौरभेयाय।
हरवाहनाय चैते वृषमनवोऽथेति तस्य गायत्री।।१२४।।

‘सौरभेयाय विद्महे महाबलाय धीमहे। तन्नो वृषः प्रचोदयात्’।

विमर्शिनी

ऋषभमन्त्रानाह—ऋषभायेति। नमोऽन्त ऋषभायेति नमोऽन्त इति प्रत्येकं सम्बध्यते। महाबलायेति, तथा सौरभेयायेति, तथा हरवाहनायेति, एते वृ[१]षमनवः। अथेति तस्य गायत्री च भवति।।१२४।।

तां लिखति—सौरभेयायेत्यादि।।

विवरणम्

अथ शिवे लोकपालानन्तरं वाहनमिति तदीयमूलमन्त्रादिसर्वमाह—ऋषभायेति।।१२४।।

ओं नमः षण्मुखायेति स्कन्दमैन्द्र्यां स्थितं यजेत्।
शास्तारमग्नौ भांबीजं भूताधिपतये नमः।।१२५।।

विमर्शिनी

स्कन्दाद्यावरणं क्रमेण विवृणोति—ओं नम इत्यादि। ऐन्द्र्यां प्राच्यां स्थितं स्कन्दं ‘ओं नमः षण्मुखाये’ति यजेत्। अग्नौ भांबीजयुक्तं ‘भूताधिपतये नम’ इति मन्त्रेण शास्तारं यजेत्।।१२५।।

---

१. ‘षे’ क पाठः।

Shripuram Publications
www.shripuram.org

विवरणम्

स्कन्दाद्यावरणमन्त्रान्यथाभ्युपगमं सर्वदेवविषयानाह[1]—ओं नम इति। पितृपतौ धर्ममातृरित्यत्र धर्ममन्त्रो धर्मराजाय नम इति सामान्यसिद्ध एव।।१२५।।

वीरभद्रं गणपतिं प्राक्प्रत्यक्पार्श्वयोस्ततः।
ब्रह्माणीमपि तन्मध्ये यजेन्माहेश्वरीमपि।।१२६।।

कौमारीं वैष्णवीं तद्वद् वाराहीं च सबीजकैः।
नाममन्त्रैस्तथेन्द्राणीं चामुण्डीं सजिनाक्षरैः।।१२७।।

'वीरभद्राय विद्महे महानन्[2]नाय धीमहे। तन्नः शान्तः प्रचोदयात्'।
'एकदंष्ट्राय विद्महे गजाननाय धीमहे। तन्नो दन्तिः[3] प्रचोदयात्'।
'ब्रह्मभूतायै विद्महे कुशहस्तायै धीमहे। तन्नो ब्राह्मी प्रचोदयात्'।
'महेश्वरभूतायै विद्महे शूलहस्तायै धीमहे। तन्नो माहेश्वरी प्रचोदयात्'।
'स्कन्दभूतायै विद्महे शक्तिहस्तायै धीमहे। तन्नः कौमारी प्रचोदयात्'।
'विष्णुभूतायै विद्महे चक्रहस्तायै धीमहे। तन्नो वैष्णवी प्रचोदयात्'।
'प्रजापतिभूतायै विद्महे गदाहस्तायै धीमहे। तन्नो वाराही प्रचोदयात्'।
'इन्द्रभूतायै विद्महे वज्रहस्तायै धीमहे। तन्न इन्द्राणी प्रचोदयात्'।
'रुद्रभूतायै विद्महे खड्गहस्तायै धीमहे। तन्नश्चामुण्डी प्रचोदयात्'।

विमर्शिनी

पुनर्दक्षिणे ओं धर्माय नमः इति धर्ममाराध्य तत्पश्चिमे मातॄर्यजेत्। तत्र प्राक्प्रत्यक्पार्श्वयोर्वीरभद्रं गणपतिं च यजेत्। ततस्तन्मध्ये सबीजकैः, वीं गं व्यों मं[4] मां ह्यौं[5] हें हों हूं एतानि बीजानि, स्वस्वनाममन्त्रैः ब्रह्माणीं माहेश्वरीं कौमारीं वैष्णवीं वाराहीमिन्द्राणीं चामुण्डीं यजेत्। [6]सजिनाक्षरैः स्वस्वगायत्रीभिश्च।।१२६-१२७।।

गायत्रीः क्रमेण पठति—वीरभद्रायेत्यादि।।

---

१. 'होन्नम पितृ' क पाठः। २. 'से' ग पाठः। ३. 'न्ती' ख. ग. घ पाठः। ४. 'ओं' ख. ग पाठः। ५. 'हें ह्यौ हों'। ६. 'स्व' ङ पाठः।

Shripuram Publications www.shripuram.org

विवरणम्

वीरभद्रमिति। सबीजकैर्न्नाममन्त्रैस्सजिनाक्षरैरिति सर्वत्रापि सम्बध्यते। प्राक्प्रत्यक्पार्श्वयोरिति मिथस्सम्मुखाविति ज्ञेयम्—

'द्वयोः स्वाद्यर्णमेकस्या वायुस्थं सतिलं द्वयोः।
बीजं विषं खमन्यासाञ्चातुर्थाद्य त्रयोदशैः।।
स्वरैराद्यद्वितीयद्वादशैरेकादशेन च।
त्रयोदशेन षष्ठेन युक्तं बिन्द्वन्वितं क्रमात्।।'

इति। यथा वीं वीरभद्राय नमः इति। 'व्यों ब्रह्माण्यै नमः' इत्यादि। इति।।१२६-१२७।।

मातृभ्यो लोकमातृभ्यः सर्वमातृभ्य इत्यपि।
सर्वमातृगणेभ्यश्च क्रमाद् दिक्षूर्ध्वतोऽमुना।।१२८।।

'नानारूपा मातरः प्रतिदिशं व्यवस्थिताः दिव्यन्तरिक्षभौमाः पातालनिवासिन्यश्चेहायान्तु विष्णवाज्ञया मामनुगृह्णन्तु प्रतिगृह्णन्तु पूजां सौम्यरूपधारिण्यस्ताभ्यो देवीभ्यो नमो नमः स्वाहा'।

विमर्शिनी

'मातृभ्यो नमः' इत्यादिभिश्चतुर्भिर्मन्त्रैः क्रमाद् दिक्षु, अमुना 'नानारूपा' इत्याद्येन मन्त्रेण ऊर्ध्वतो यजेत्।।१२८।।

मालामन्त्रं पठति—नानारूपा इति।।

विवरणम्

क्रमाद्दिक्ष्विति। मातृपीठान्तर्भागे प्रागादिचतुर्दिक्षु। यद्वाग्न्यादिचतुर्दिक्षु। यदुक्तं-

"मातृभ्यो लोकमातृभ्यः सर्वमातृभ्य इत्यपि।
सर्वमातृगणेभ्योऽन्ते सर्वदिक्षूर्ध्वतोऽमुना।।"

इति[1]। यद्वा क्रमाद्दिक्ष्विति प्राङ्मध्यपश्चाद्दिक्षु क्रमेणेति भावः। ऊर्ध्वतोमुनेति। तन्मध्ये नानारूपेति मालामन्त्रेणेत्यर्थः। प्राङ्मध्यादि दिक्क्रमे तूपर्येतद्भवति।।१२८।।

---

१. 'ति। क्र' क पाठः।

Shripuram Publications
www.shripuram.org

साधारणमनौ विष्णुपदे स्वस्वाक्षरं पठेत्।
सर्वत्राकाशमातृभ्यस्तद्गणेभ्योऽपि वा हरेत्।।१२९।।

विमर्शिनी

साधारणमनौ साधारणेऽस्मिन् मन्त्रे विष्णुपदे स्वस्वाक्षरं शिवादिपदं पठेत्। पुनः सर्वत्र आकाशमातृभ्यस्तद्गणेभ्य इत्यपि हरेद्वा।।१२९।।

विवरणम्

सर्वत्राकाशमातृभ्य इति। विष्णुशिवादिष्वित्यर्थः।।१२९।।

निजमन्त्रशास्तृशम्बरकुमारहस्त्यश्वनीलकालाश्च[1]।
आर्यार्चने कपर्द्युग्रो रुद्रसुतश्च भूतनाथश्च।।१३०।।

विमर्शिनी

आर्यार्चने निजमन्त्रशास्तृशम्बरकुमारहस्त्यश्वनीलकालाश्च निजमन्त्रो निजमूलमन्त्रः 'शास्त्रे नमः' 'शम्बरकुमाराय नमः' 'हस्त्यश्वाय नमः' 'नीलाय नमः' 'कालाय नमः' कपर्दी 'कपर्दिने नमः' उग्रः 'उग्राय नमः' रुद्रसुतश्च 'रुद्रसुताय नमः' भूतनाथश्च 'भूतनाथाय नमः' एते मन्त्राः।।१३०।।

विवरणम्

तथार्यं भृङ्ग इति यदुक्तं तत्र मूलादिसर्वमाह—निजमन्त्रेति। निजमूलमन्त्रग्रहणमेतत्।।१३०।।

भूतनाथाय विद्महे भवपुत्राय धीमहे।
गायत्री चेति तन्त्रोक्ता[2] तन्नः शास्ता प्रचोदयात्।।१३१।।

चाम्बादीनां गणाः सर्वे कोटिकोटिगणाधिपाः।
भवन्तु[3] सहिताः सर्वे तेभ्यस्ताभ्यो नमो नमः।।१३२।।

विमर्शिनी

तत्र 'भूतनाथाय विद्महे' इत्याद्या गायत्री चोक्ता।।१३१, १३२।।

---

१. 'श्च।। सकपर्द्युग्रो रुद्रसुताद्यं च शास्तृयजनेस्युः।। भू'। २. 'संप्रोक्ता' ग, 'स्योक्ता' क. घ पाठः। ३. 'न्ति' क पाठः।

www.shripuram.org

चाम्बाद्यः पश्चिमे शास्तुः स्वनाम्नार्च्यो दिवाकरः।
खषोत्कायेति मन्त्रो वा हुतान्तस्तद्विधौ स्मृतः।।१३३।।

विमर्शिनी

शास्तुः पश्चिमे चाम्बाद्यः 'चाम्बादीनां गणा' इत्याद्यो मन्त्रः स्यात्। निर्ऋतिबहिः स्वनाम्ना 'ओं सूर्याय नमः' इति वा, हुतान्तः स्वाहान्तः 'खषोत्काये'ति मन्त्रो वा तद्विधौ सूर्ययजने स्मृतः।।१३३।।

विवरणम्

चाम्बादीनामित्युक्तबलेः स्थानमाह—चाम्बाद्याः पश्चिमे शास्तुरिति। स्वनाम्नार्च्यो दिवाकर इति। तदेव स्वन्नाम बोद्धव्यम्।।१३३।।

ओं तदादिद्विषट्केण[१] ब्रह्मा हूमिति सूकरः।
दुर्गा स्वमूलतः स्कन्दो मूलनामजिनाक्षरैः।।१३४।।

'सनत्कुमाराय विद्महे षडाननाय धीमहे। तन्नः स्कन्दः प्रचोदयात्'।

ओं तदादिद्विषट्केण 'ओं तत्सन्नमो ब्रह्मणे तत्सन्नमः' इति द्वादशाक्षरेण ब्रह्मार्च्यः। हूमिति बीजेन सूकरो वराहोऽर्च्यः। दुर्गा स्वमूलतोऽर्च्या। मूलनामजिनाक्षरैः स्वमूलेन षण्मन्त्रैर्गायत्र्या च स्कन्दोऽर्च्य।।१३४।।

तद्गायत्रीं पठति—सनत्कुमारायेति।।

विवरणम्

ओं तदादिद्विषट्केण ब्रह्मेति। बाह्यं द्वादशाक्षरमुक्तं; तच्च प्रथमपटल उक्तं 'तत्सन्नमः प्रपुटितमि'त्यादि।।१३४।।

श्रीधराश्वमुखौ पार्श्वद्वये वागीश्वरी क्रिया।
कीर्तिर्लक्ष्मीस्तथा सृष्टिर्विद्या शान्तिश्च मातरः।।१३५।।

विमर्शिनी

पुनरुत्तरमातृणां पार्श्वद्वये श्रीधराश्वमुखै। तन्मध्ये वागीश्वरी क्रिया कीर्तिः लक्ष्मीः

---

१. 'तत्सदादिस्वष' ख. ग. घ. च पाठः।

Shripuram Publications
www.shripuram.org

सृष्टिः विद्या शान्तिश्च सप्त मातरः।।१३५।।

तद्बीजं तुर्यषष्ठौ च द्वादशश्च त्रयोदशः।
आद्यश्चैकादशश्चैव द्वितीयश्चेन्द्रगाः स्वराः।।१३६।।

विमर्शिनी

तत्र इन्द्रगाः लकारगताः तुर्यषष्ठौ द्वादशः त्रयोदशश्च आद्याः एकादशश्च द्वितीयश्च स्वराः। लीं लूं लैं लों लं लें लां इति तद्बीजं तासां बीजानि।।१३६।।

विवरणम्

तद्बीजमिति। तासां सप्तानां बीजम् इन्द्रगास्तुर्यषष्ठादिस्वराः। इन्द्रे लकारः यथा लीं वागीश्वर्यै इत्यादि। श्रीधराश्वमुखयोस्तु स्वाद्यक्षरं बीजं द्रष्टव्यम्।।१३६।।

गायत्रीरहितं सर्वं योज्यमत्रापि पूर्ववत्।
शिवं यजेत् षडर्णेन नाम्ना निर्माल्यधारिणम्।।१३७।।

विमर्शिनी

अत्रापि गायत्रीरहितं सर्वं मन्त्रजातं पूर्ववद् दक्षिणमातृवद् योज्यम्।

षडर्णेन स्वेन षडक्षरेण शिवं यजेत्। निर्माल्यधारिणं[१] स्वनाम्ना यजेत्।।१३७।।

विवरणम्

योज्यमत्रापि पूर्ववद् इति। प्रागुक्तमातृवदित्यर्थः। तुहिनरुचावंबिकामित्यत्र 'ओं अमबिकायै नमः' इत्येव मन्त्रः। नाम्ना निर्माल्यधारिणमिति। स्वस्वनाममन्त्रेणेत्यर्थः।।१३७।।

विष्वक्सेनोऽन्तवौङ्कारो नमोऽन्तः परिकीर्तितः।
क्लीं मुण्डिन्यै नम इति मुण्डिनीमनुरीरितः।।१३८।।

विमर्शिनी

विशेषमाह—विष्वक्सेन इति। अन्तवौङ्कारः नामान्ते वौंकारयुक्तः नमोन्तश्च विष्वक्सेनः 'ओं विष्वक्सेन वौं नमः' इति मन्त्र इत्यर्थः। 'क्लीं मुण्डिन्यै नमः' इति

१. 'णं स्वस्व' ख. ग. घ. ङ. च पाठः।

Shripuram Publications
www.shripuram.org

मुण्डिनीमनुरीरितः॥१३८॥

विवरणम्

क्वचिन्मूलमन्त्रमपि दर्शयति—विष्वक्सेन इति॥१३८॥

चण्डेश्वरस्य मन्त्रोऽथ धुनिचण्डहुमस्त्रकम्।
चण्डेति चण्डचण्डेति नाम चण्डेश्वरेति च॥१३९॥

विमर्शिनी

अथ धुनिचण्डहुमस्त्रकम् इति चण्डेश्वरमन्त्रः। चण्डेति चण्डचण्डेति चण्डेश्वरेति च नाम। 'चण्डाय नमः' इत्याद्या नाममन्त्रा इत्यर्थः॥१३९॥

चण्डचण्डाय विद्महे चण्डेश्वराय धीमहे।
इति चण्डेशगायत्री तन्नश्चण्डः प्रचोदयात्॥१४०॥

विमर्शिनी

चण्डचण्डेत्याद्या तस्य गायत्री च॥१४०॥

गोपुरद्वारि सम्पूज्यौ शङ्खपुष्पनिधी हरौ।
शङ्खचक्रौ बहिर्द्वारि ततः सर्वत्र घोषयेत्॥१४१॥

ये समस्तं जगद् व्याप्य तिष्ठन्ति बलिकाङ्क्षिणः।
विष्णुपारिषदाः सर्वे गृह्णन्तु बलिमुत्तमम्॥१४२॥

विमर्शिनी

हरौ गोपुरद्वारि शङ्खपुष्पनिधी शङ्खनिधिः पुष्पनिधिश्च पूज्यौ। तत्र बहिर्द्वारि शङ्खचक्रौ चेति भूतबलेरत्र विशेषः। ततः सर्वत्र ये समस्तमित्यादिना घोषयेद् उच्चैरुच्चरेत्॥१४१-१४२॥

विवरणम्

अथ विष्णावुत्सव एव सभायां द्वाःस्थानुपदिशति—गोपुरद्वारीति। सभान्तर्द्वाराभिप्रायम्। शङ्खपुष्पनिधी हराविति। प्राग्द्वाःस्थानुक्रमणे श्रीः पुष्टिसंज्ञापीत्युक्तयोरय-

Shripuram Publications
www.shripuram.org

मपवादः। यद्वा तत्पूजापूर्वकमनयोरपि पूजाभिप्रयते।

बहिर्द्वारीति। सभाया इति शेषः। ततः सर्वत्र घोषयेदिति सर्वेष्वपि समानम्।।१४१।।

ये समस्तमिति। उपस्थानमित्यर्थः। घोषयेदित्यनेनोपस्थानसमये तदङ्गतया वाद्यघोषणमपि सूचितम्। बहिर्निष्क्रम्य घोषयेद् 'ये समस्त'मित्यादि चान्यत्रोक्तम्।।१४२।।

आराध्य ध्वजदेवतादिबहिरावारद्वयं पूर्ववद्
विष्णौ दिग्गणमन्त्रतश्च दशदिक्ष्वत्राहरेद् वा बलिम्।
ये भूतादिपुरःप्रभृत्युपरिनिष्ठैः सर्वदिक्षु क्रमात्
पीठस्याधिपतिं निजावृतिवृतं मध्ये समभ्यर्चयेत्।।१४३।।

विमर्शिनी

विष्णौ ध्वजदेवतादिबहिरावारद्वयं कुमुदादिकं पञ्चाशत्भूतगणस्वरूपं चावरणद्वयं पूर्ववद् भूतबलिवदाराध्य दशदिक्षु दिग्गणमन्त्रतः 'पूर्वस्यां दिशि हरेरि'त्यादिमन्त्रेण अत्र तृतीयावरणे बलिमाहरेत्। वेति समुच्चयार्थः। ये भूतादिपुरःप्रभृत्युपरिनिष्ठैः 'ये भूताः पुरस्सदः इत्यादि 'ये भूता उपरिषदः' इत्यन्तैर्नवभिर्मन्त्रैः क्रमात् पीठस्य सर्वदिक्षु नवसु दिक्षु, निजावृतिवृतं कुमुदाद्यावृतिसहितम् अधिपतिं मध्ये च समभ्यर्चयेत्।।१४३।।

विवरणम्

बहिरावारद्वयं पूर्ववदिति। भूतबल्युक्तवदित्यर्थः। दिग्गणमन्त्रतश्चेति। 'पूर्वस्यां दिशि विष्णोर्भगवतः' इत्यादिमन्त्रग्रहणम्। आहरेद्वा बलिमिति। बल्यकरणमपि[1] विकल्प्यते। सर्वदिक्षु क्रमादिति। मन्त्रवशान्नवदिशामेव ग्रहणम्। क्रमान्नवाशासु। यदीह योजयेदिति ह्युक्तं, बलिमाहरेदिति चानुषङ्गः। निजावृतिवृतमिति। तदुक्तं-'कुमुदाद्यष्टकमिष्ट्वा मध्येपीठं यजेत हरिसेनम्' इति।।१४३।।

स्थाणौ भूतबलिक्रमेण बलिपीठान्तं बहिः स्याद् बलि-
र्यत्रान्तः शिववद् बहिश्च शिववत् तत्रान्यतश्चान्यथा।

---

१. 'मिति वि' क. पाठः।

Shripuram Publications
www.shripuram.org

दुर्गायां प्रथमोदितावरणबाह्येऽर्च्याः सुदुर्गादय-
स्तत्तद्दिश्यगणाः स्मरद्विषि महाकालादयश्चोदिताः ।।१४४।।

विमर्शिनी

स्थाणौ भूतबलिक्रमेण बलिपीठान्तं बहिर्बलिः स्यात्। यत्र देवेऽन्तर्बलिः शिववत् 'पूर्वस्यां दिशी'त्यादिकं 'ये भूताः' इत्यादिकं चान्तः परिगृह्यते, तत्र बहिश्च शिववद् बलिपीठपर्यन्तबलिर्भूतबलिक्रमेण स्यात्। अन्यतश्चान्यथा यत्रान्तर्विष्णुवद् भवति तत्र बहिरपि विष्णुवदित्यर्थः। दुर्गायां प्रथमोदितावरणबाह्ये काल्यादिध्वजावरणबाह्येऽष्ट-कोटिगणेभ्य इत्यस्य स्थाने सुदुर्गादयः तत्तद्दिश्यगणाः तत्तद्दिग्भवा गणा अर्च्या उदिताः। स्मरद्विषि महाकालादयो विंशद्भूतगणाश्च।।१४४।।

विवरणम्

बलिपीठान्तमिति। ध्वजदेवताद्यावरणद्वयं सावरणबलिपीठाधिपश्चोक्तः। यत्रान्त-श्शिववद् बहिश्च शिववत्तत्रेति वाक्यम्। 'दिग्दिक्ष्वीशगणेशवह्निभुवी'त्यत्र चैतत्सर्वम-भिहितम्। अन्यतश्चान्यथेति। यत्रान्तर्हरिवत्तत्र बहिरपि हरिवदित्यर्थः। प्रथमोदिता-वरणबाह्य इति। ध्वजावरणानन्तरमिति भावः। सुदुर्गादिगणानां सङ्ग्रहोद्देशमात्रमेव भूतबलौ महिषहन्त्र्यामष्टकोट्येत्येतादित्यभिप्रायः।।१४४।।

ये भूतादिमनुद्वयेन पृथगावृत्त्या गुहेऽत्रार्यके
चाम्बेत्यादिभिरुत्सवार्थमिति विघ्नेशे ग्रहोपान्ततः।
सर्वत्रैकपरिक्रमात् त्रिविधमन्त्रैर्ये समस्तं नमो
गृह्णन्त्वादिभिरीश्वरे प्रथमतो वैतैर्ध्वजावारतः।।१४५।।

विमर्शिनी

गुहेऽत्र षट्कोट्यावरणान्ते ये भूतादिमनुद्वयेन 'ये भूताः स्कन्दसेनस्य' इत्यादिना 'बलिग्रहेभ्यो भूतेभ्यः' इत्यादिना च पृथगावृत्त्या आवरणद्वयेन बलिं हरेदिति शेषः। आर्यके एतत्स्थाने चाम्बेत्यादिभिः 'चाम्बादीनां गणाः' इत्यादिना 'नमोऽस्तु भीमरूपेभ्यः' इत्यादिना 'प्राग् गणेभ्यः' इत्यादिना 'सर्वेभ्यः पिङ्गलेभ्यः' इत्यादिना च वक्ष्यमाणैश्चतुर्भिर्मन्त्रैः पृथगावृत्त्या च, विघ्नेशे एतत्स्थाने 'उत्सवार्थमि'ति मनुन च

Shripuram Publications
www.shripuram.org

बलिं हरेत्। सर्वत्र सर्वदेवेषु ग्रहोपान्ततः देवग्रहादेः पूर्वं ये समस्तं नमो गृह्णन्त्वादिभिः 'ये समस्तमि'त्यादिना 'ओं नमो भूतेभ्यः' इत्यादिना 'गृह्णन्तु बलिम्' इत्यादिना च त्रिविधमन्त्रैः एकपरिक्रमाद् एकावृत्त्या च बलिं हरेत्। ईश्वरे ध्वजावारतः नन्द्यादिध्वजा-वरणात् प्रथमत एतैस्त्रिविधमन्त्रैर्वा।।१४५।।

विवरणम्

ये भूतादिमनुद्वयेन पृथगावृत्त्या गुहेऽत्रेति। प्रथमोदितावरणबाह्य इत्यर्थः। यदुक्तं-"तन्मत्रेण नमोऽन्तेन ध्वजमूले बलिं हरेत्। ये भूतादिमन्त्रमुक्त्वा-"द्वितीयावरणे दिक्षु मन्त्रेणानेन दापयेत्" इत्यादि। ध्वजदेवतावरणं 'षट्कोट्योद्भिदुरा गुहे'[1] इत्येतदावरणञ्च सम्पूज्य पुनरेतदावरणद्वयं पुनर्महाबलिपीठे बलिरिति बोद्धव्यम्। शास्तरि गणपतौ च सममेतत्। अथ सर्वत्र ग्रहोपान्ततस्त्रिविधमन्त्रैरेकपरिक्रमादित्यन्वयः। सर्वत्र सर्वदेवेषु। एकपरिक्रमादिति। एकावृत्त्येत्यर्थः। एतदनन्तरमेव देवासुरादिग्रहबलिः। ईश्वरे प्रथमतो वैतैर्ध्वजावरत इति बहिर्निष्क्रम्य 'ये समस्त'मित्युपस्थानानन्तरमिममेकावृत्या बलिं विकीर्य पुनर्नन्द्यादिध्वजदेवताः पूजयेत्। महाबलिपीठसमनन्तरं देवासुरादिग्रहबलिरेवेति भावः।।१४५।।

सुदुर्गा च विदुर्गा च निदुर्गा [2]सुविलोचना।
सुलोचना सुभद्रा चातिदुर्गा दुर्गविक्रमा।।१४६।।

अकन्या च सुकन्या च रविकन्या च कन्यका।
र[3]क्षःकन्या मारकन्या सुरकन्या रविप्रभा।।१४७।।

कृत्तिका कार्तिका सर्वकार्तिका कार्तिकायनी।
कृत्यान्ति[4]का कृत्यकन्या कृत्तिनी कृत्तिकोद्भवा।।१४८।।

वामा सुवामा वामार्हा वामाङ्गी वामलोचना।
वामोद्भवा वामसमा वाममूर्तिधरा पुनः।।१४९।।

देवी सुदेवी यादेवी समदेवी सुमर्दिनी।
विदेवी रविदेवी च देवदेवीति कीर्तिता।।१५०।।

---

१. 'मि' क पाठः। २. 'च' क. पाठः। ३. 'यक्ष' ख. ग. घ. पाठः। ४. 'न्त' ख. पाठः।

Shripuram Publications
www.shripuram.org

अदण्डा च विदण्डा च सुदण्डा दण्डविक्रमा।
शतदण्डा महादण्डा दुर्दण्डा दुरतिक्रमा।।१५१।।

अगौरी च विगौरी च सुगौरी गौरिविक्रमा।
निर्गौरी चैव दुर्गौरी सुगौरी गौरिवल्लभा।।१५२।।

जया च विजया चैव अजया च जयावती।
सुजया च जयाक्रान्ता[1] जयन्ता[2] जयविक्रमा।।१५३।।

काली चैव सुकाली च विकाली कारकालिका।
दुष्काली[3] कार्तिकाकाली निष्काली भद्रकालिका।।१५४।।

समेदिनी सुमेदिनी वसुधा च वसुन्धरा।
भूमिरुर्वी धरा पृथ्वीति क्रमात् परिकीर्तिताः।।१५५।।

विमर्शिनी

सुदुर्गाद्यष्टविधाः शक्तिराह—सुदुर्गेति।।१४६-१५५।।

विवरणम्

सुदुर्गाद्यष्टशक्त्यन्ते[4] प्राक्स्थिताभ्योक्षरान्ततः।
स्याद् देवग्रहशक्तिभ्यो दुर्गावर्णसमन्वितः।।१५६।।

कोटिपारिषदीभ्योऽन्ते नमो नम इतीरितः।
प्राङ्मन्त्रोऽन्यत्र तच्छक्तिदिग्ग्रहार्णविभेदितः।।१५७।।

विमर्शिनी

अष्टविधशक्तीनां मन्त्रानुद्धरति—सुदुर्गाद्यष्टशक्त्यन्त इति। सुदुर्गाद्यष्टशक्तीरुक्त्वा प्राक्स्थिताभ्योऽक्षरान्ततः 'प्राक्स्थिताभ्यः' इत्यक्षराणामन्तः देवग्रहशक्तिभ्यो दुर्गावर्णसमन्वितः 'देवग्रहशक्तिभ्यो दुर्गा' इति वर्णैर्युक्तः, कोटिपारिषदीभ्यः इत्यन्ते नमो नमः इति प्राङ्मन्त्र ईरितः स्यात्। सुदुर्गेत्यादि पद्यमुक्त्वा वा, 'ओं सुदुर्गाविदुर्गानिदुर्गासुविलोचनासुलोचनासुभद्रातिदुर्गादुर्गविक्रमाभ्यः' इत्युक्त्वा वा 'प्राक्स्थिताभ्यो देवग्रहशक्तिभ्यो दुर्गाकोटिपारिषदीभ्यो नमो नमः' इति प्राङ्मन्त्रः।

---

१. 'का'। २. 'या' ख. ग. पाठः। ३. 'र्गा' क. ख. ग. पाठः। ४. 'र्गाष्टकश' ख. पाठः।

www.shripuram.org
Shripuram Publication
www.shripuram.org

अन्यत्र नवसु मन्त्रेषु तच्छक्तिदिग्ग्रहार्णविभेदितः तत्तच्छक्तिभिर्दिग्भिर्ग्रहार्णैश्च विशेषेण भेदितः। अकन्याद्यष्टशक्त्यन्ते 'अग्निदिक्स्थिताभ्योऽसुरग्रहशक्तिभ्यः' इत्याद्यूहयेत्। अपर्यधोभागयोर्ब्रह्मग्रहसर्पग्रहौ योज्यौ।।१५६-१५७।।

विवरणम्

तेषामेवावशेषभागमाह-सुदुर्गाद्यष्टशक्त्यन्त इति। यथा 'ओं सुदुर्गा च विदुर्गा चे'त्यादि 'दुर्गविक्रमे'त्यन्तमुक्त्वा 'प्राक्स्थिताभ्यो देवग्रहशक्तिभ्यो दुर्गाकोटिपारिषदीभ्यो नमो नमः' इति। एवमकन्या चेत्यादिष्वपि ज्ञेयमिति। कालीचैव सुकाली चेत्युपरिमन्त्रः। यदुक्तमूर्ध्वतः 'काल्याद्यं वसुधाद्यं स्यादधस्तादष्टकं पुनः' इति। वसुधापदेन समेदिनीत्याद्युपलक्ष्यथे। अत्रार्था'दुपरिस्थिताभ्यो दुर्गाकोटिपारिषदीभ्यो नमो नमः। अधःस्थिताभ्यो दुर्गाकोटिपारिषदीभ्यो नमो नमः' इत्येवावशेषः स्यादिति।।१५६-१५७।।

महाकालो विधाता च वज्रपाणिः क्रतुः प्रभुः।
दक्षः शतक्रतुर्मूर्तिरप्रमेयश्च वीर्यवान्।।१५८।।

नित्यो विद्युत्प्रभः शूली शूलहस्तस्त्रिणेत्रवान्।
स्वाङ्गदीप्तस्तमोघातः सृष्टिकृद् वीर्यविक्रमः।।१५९।।

मान्धाता सृष्टिकृद् वीर्यो नित्ययोगः प्रतापवान्।
एते विंशतिकोटीनां प्राक्स्थितानां नमो नमः।।१६०।।

अग्निरग्निसमानश्च ज्वाली[1] विश्वभुगव्ययः।
हुताशी मूर्तिमान् व्यापी कपिलो रक्तलोचनः।।१६१।।

उग्रो रक्तवपुर्धूम्रः सप्तार्चिर्विश्वभेषजी।
हुतभुक् सत्यवान् वेगी भस्मच्छन्नो मरुत्सखः।।१६२।।

योगप्रियः सदाकाङ्क्षी दारुजः स्पन्दनो जटी।
इत्येते कोटिगुणिता अग्निरूपा नमो नमः।।१६३।।

---

१. 'ज्व'क. पाठः।

Shripuram Publications
www.shripuram.org

यमो वैवस्वतो धाता शत्रुघातः प्रजान्तकः।
मृत्युः प्रेताधिपो धर्मः कृष्णः कृष्णाक्ष एव च।।१६४।।

नित्ययोगी सुहृत्क्षेमी आत्मधर्मी सदान्तकः।
मायारूपी प्रजाकाङ्क्षी सत्यासत्यप्रियः सुहृत्।।१६५।।

इत्येते कोटिगुणिता यमरूपा नमो नमः।
[1]रक्षोऽसुरः पिशाचश्च निर्ऋतिर्वीर एव च।।१६६।।

तीक्ष्णश्चक्षुर्ब्रसीदेही यज्ञहर्ता विनायकः।
अतिमूर्तिरनेकाङ्गी क्रूरः क्रूरवपुर्महान्।।१६७।।

सूक्ष्मरुद्रो विरूपाक्षो भस्माङ्गी धूम्रलोचनः।
इत्येते कोटिगुणिता निर्ऋतिरूपा नमो नमः।।१६८।।

वरुणः शम्बरो भृङ्गी निम्नगाधिपतिः क्षमः।
श्रीमानभ्रघनः कान्त आनन्दस्तत्त्वदर्शनः।।१६९।।

पाशहस्तः पशुर्वेगी आ[2]क्रन्दः श्यामलोचनः।
कपर्दी प्राणदः श्यामः सत्यबुद्धिः सनातनः।।१७०।।

इत्येते कोटिगुणिता वरुणरूपा नमो नमः।
वायुर्गन्धवहः सूक्ष्मस्तत्त्वात्मानन्द एव च।।१७१।।

प्राणोऽपानः समानश्च ज्ञानाक्षो ज्ञानिनो वरः।
कपाली शूलपाणिश्च व्यानोदानौ च साकली।।१७२।।

अमाली मालवान् बिन्दुर्मूलशाकी विभावरी।
इत्येते कोटिगुणिता वायुरूपा नमो नमः।।१७३।।

यक्षोऽथ रयिवान् सोमः सूक्ष्मः कालो निराश्रयः।
आलम्बो भैरवो भिक्षुर्वि[2]कारो वाम एव च।।१७४।।

---

१. 'कान्तः श्या' क पाठः। २. 'कि' क पाठः।

Shripuram Publications
www.shripuram.org

ज्येष्ठो मालाधरश्चण्डो मनश्चोन्मन एव च।
रौद्रो बलधरः कालः सर्वत्र बलवानपि।।१७५।।

इत्येते कोटिगुणिता यक्षरूपा नमो नमः।
ईशान ईश्वरः शम्भुः शूलहस्तस्त्रिणेत्रवान्।।१७६।।

अनादिनिधनो रागी कपिलः कपिलाक्षधृक्।
रुद्रो गणाधिपो योगी[१] विश्वहर्ता दिगम्बरः।।१७७।।

धूम्राक्षो धूम्ररूपश्च नीलो विश्वभुजो हरः।
इत्येते कोटिगुणिता रुद्ररूपा नमो नमः।।१७८।।

महाबलो महानादो मूर्तिर्मूर्तिपतिः शिवः।
पवित्रो राजयः स्थाणुरघोरो घोर एव च।।१७९।।

अरुणो लाङ्गलो मन्युरङ्गारः शिवभूषणः।
जीमूतो मूर्तिकृद् वाग्मी मन्त्रीशस्त्रिपुरान्तकः।।१८०।।

गणाधिपाः शिवस्यैते ऊर्ध्वरूपा नमो नमः।
बुधः प्रतर्दनः[२] शुद्धः कालरूपोग्रदंष्ट्रवान्।।१८१।।

दीर्घबाहुः प्रकाशश्च भर्ता हर्ता विचक्षणः।
कालाग्नी रौरवोऽघोरो नरकः शर्व एव च।।१८२।।

नागश्चैवाथ घोरश्च किम्बुरुर्दनुजः क्षमी।
इत्येते कोटिगुणिताः पातालास्ते नमो नमः।।१८३।।

ये भूताः स्कन्दसेनस्य पार्षदा बलिभोजिनः।
तृप्यन्तु ते मुदं यान्तु सद्भ्योऽसद्भ्यो नमो नमः।।१८४।।

'बलिग्रहेभ्यो भूतेभ्यः स्कन्दपार्षदेभ्यो नमो नमः स्वाहा।'

---

१. 'योनिर्विश्च' ख. ग पाठः। २. 'म' ख. ग पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

स्कन्दे ये भूतादिमन्त्रद्वयं पठति—ये भूता इत्यादि।।१८४।।

विवरणम्

महाकालो विधातेत्यादि। दश मन्त्रा भवन्ति। तेषाञ्च नमो नम इत्यवसानं प्रतिपत्तव्यम्। यद्यपि विष्णवादिष्वपीदृशा मन्त्राः सन्ति किन्तु तथा प्रयोगोऽपि विजयबल्यादिष्वपि असुलभ इति तेषामनाम्नानमिति बोद्धव्यम्। यथा विष्णौ तावत्—

"उत्कटः प्रकटश्चैव उन्मुखोविमुखस्तथा।
अश्वग्रीवोऽश्ववदन अश्वजिह्वस्तथैव च।।
हस्तिवक्त्रो मुकुन्दश्च हस्तिपादस्तथैव च।
केशवो वामनश्चैव नरो नरक एव च।।
मन्दरो मन्ददृष्टिश्च कन्दुकः कटुलोचनः।
पटहाक्षो विशालाक्षः क्षामकः क्षमकस्तथा।।
अश्वसेनो विसेनश्च विष्वक्सेनो विदारणः।
पाण्डरः पाण्डुपृष्ठश्च दुर्दिनस्सुदिनस्तथा।।
वामदेवो महादेवो महानी मधुसूदनः।
कालकः कलनश्चैव भावनो भगवानपि।।
भानुमान् भागधेयश्च भास्करो भासुरस्तथा।
विश्वसेनो विसेनश्च विष्वक्सेनो विदारणः।।
विस्तरो विश्वरश्चैव विदण्डी दण्ड एव च।
क्रमकः कामकश्चैव कामभृत्कामशासनः।।
पञ्चाशच्च गणा ह्येते पूर्वं दिशमुपाश्रिताः।
एते पारिषदाः प्रोक्ताः कुमुदस्य वशानुगाः।।

१. 'तत्सदादिस्वष' ख. ग. घ. च पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

ऐन्द्यां दिशि पञ्चाशद्भूतगणेभ्यो नमः।
आग्नेयो निधनश्चैव अग्निजिह्वो हुताशनः।।
अग्निरूपोऽग्निकेशश्चाग्निवर्णोऽग्निरेव च।
अग्निवक्त्रो महावक्त्रो महासेनो महोदरः।।
करालः कालजिह्वश्च काकवक्त्रो विवक्त्रकः।
मण्डु[1]र्मण्डूकवक्त्रश्च देवलो देवकस्तथा।।
शार्वरः श[2]मकश्चैव शङ्कुश्शङ्कुश्रवास्तथा।
मारीचो द्रोणमारीचो महिषो माहिषस्तथा।।
कुम्भनासो विनासश्च कुम्भकर्णोऽथ कुम्भकः।
विसारी विक्रमी चैव मस्करी मस्करस्तथा।।
सूकरः सूकरास्यश्च शशः शशमुखस्तथा।।
सिंहस्सिंहमुखश्चैव नरसिंहो दलस्तथा।।
कालभृत्काळसूत्री च सूत्रभृत्सूत्र एव च।
विनाळी नालकर्णश्च आग्नेयीं दिशमाश्रिताः।।
कुमुदाक्षगणाह्येते आसुरग्रहसंयुताः।
आग्नेय्यां दिशि पञ्चाशद्भूतगणेभ्यो नमः।।
यमो धर्मधरो धर्मो धर्मराजो धनुर्धरः।
मृत्युः कालाधिपः कालः कृष्णः कृष्णाक्ष एव च।।
नित्य[3]योगी सुहृत्क्षेमी आत्मधर्मी सदान्तकः।
विनयः प्रश्रयश्चैव निःश्रयो निपुणोऽलसः।।
कुणपः कुणिबाहुश्च कुब्जः प्रांशुर्विमर्दनः।
निष्क्रोशो निरनुक्रोशो निर्मलो निवहो वहः।।
आहे हुताहो आहाश्च हूहू रक्षण एव च।
एककः कापलश्चैव तुण्डकः कटुको विटः।।

---

१. ‘धु’। २. ‘शङ्करश्चै’ क पाठः। ३. ‘भो’ क पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

शङ्खी चक्री च धन्वी च शाङ्र्गी शाङ्र्गधरस्तथा।
वासुदेवो विभद्रश्च केतुमान्केतुकः क्षमी।।
गणाः पञ्चाशदेते तु दक्षिणं दिशमाश्रिताः।
पुण्डरीकानुगा ह्येते गन्धर्वग्रहसंयुताः।।
याम्यायां दिशि पञ्चाशद्भूतगणेभ्यो नमः।
निर्ऋतिः प्रकृतिश्चैव सुकृतिर्विकृतिस्तथा।।
दारुणो दमकश्चैव राक्षसो राजकस्तथा।
मासपोऽमासपश्चैव निष्ठुरः खरभाषणः।।
प्रलम्बो लम्बकश्चैव प्राणदः प्रणवस्तथा।
वीरसेनो गदश्चैव विभाषी च विभाषणः।।
रक्ताक्षो लोहिताक्षश्च रक्तजिह्वो विजिह्वकः।
विद्युत्केशो विशालाक्षो विक्षरो विरहस्तथा।।
अक्षरः[१] प्राक्षरश्चैव कामरूपी विरूपणः।
सर्वगस्सर्वविद्गौरः सम्भवः प्रभवस्तथा।।
वैकर्तनो विकर्ता च वारुणो वसुरेव च।
विरदो मदनश्चैव कपर्दी वृष एव च।।
नन्दकी वृषकश्चैव[३] कीनाशी वरुणोऽरुणः।
गणा एते तु पञ्चाशन्नैर्ऋतीं दिशमाश्रिताः।।
यक्षग्रहैस्तु संयुक्ता वमनस्यानुगा इमे।
नैर्ऋत्यां दिशि पञ्चाशद्भूतगणेभ्यो नमः।।
वरुणो वरुणश्चैव पाशी पाशधरो गुरुः।
क्षेपणः क्षोभणश्चैव नारदः पर्वतो रविः।।
सुनामा नामनो हंसो वैकुण्ठः परमः परः।
हनुमान् वसुमान् भेदो विरूपः प्रद्रवस्तथा।।

---

१. 'अरः प्राक्षरकश्चैव' च पाठः। २. 'विमर्दो मर्दन'। ३. 'पृ' क पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

महाकर्णो विकर्णश्च शशकः शलकः कविः।
नारदो नरकश्चैव कर्णी कर्णरथोंऽशुमान्॥
चक्रभृच्छंखभृद्वज्री वज्रनागो विनाशकः।
कुररः कुतपश्चैव दक्षिणः क्षणदः सुहृत्॥
दुर्गन्धः[१] पूतिगन्धश्च ताक्ष्र्यो गरुड एव च।
विरोधो रोधको रोधः कङ्कणी च गणास्त्वमी॥
पश्चिमां दिशमाश्रित्य तिष्ठन्ति विविधायुधाः।
शङ्कुकर्णवशा ह्येते पितृग्रहगणान्विताः॥
वारुण्यां दिशि पञ्चाशद्भूतगणेभ्यो नमः।
मरुन्मारुतगौरर्वागायुर्वायुस्तथाऽनलः॥
गळको वर्तकः कङ्को मार्गणः प्रगणो बलः।
बलो बलनिधिर्वीरो विराधो रोधको मधुः[२]॥
नवधस्सुवधश्चैव सङ्गरो धीकरस्तथा।
मली मलनिधिर्ध्वस्तः समस्तः सहसो वसुः॥
कुकरः[३] कुटकश्चैव गन्धो गन्धवहः पटुः।
सिक्तकः सिक्तरोही च सेवकस्सेवनस्सवः॥
औषधो भेषजश्चैव रोगी रोगधरस्तथा।
करणः कारणः कर्ता द्वारचारी बलोऽबलः॥
गणा पञ्चाशदेते तु वायव्यां दिशमाश्रिताः।
सर्वनेत्रानुगा नित्यं नागग्रहसमन्विताः॥
वायव्यां दिशि पञ्चाशद्भूतगणेभ्यो नमः।
सोमस्सोमलकस्सामः सामवित् सामनाशनः॥
सुधा सुधाता धाता च सुराष्ट्रः काष्ठकः कलिः।
कालवान् कालचक्रश्च कालकूट[४]विषोज्ज्वलः॥

---

१. 'गन्धर्वः पू' च पाठः। २. 'ऽधमः' क पाठः। ३. 'कुरकः कु' च पाठः। ४. 'टो' ख. च पाठः।

Shripuram Publications
www.shripuram.org

अमृतोऽमृतनाभश्च केयूरी केवली बली।
विष्णुः कृष्णः विशङ्गी च रेखो लेखः पिकः शुकः।।
उलूकः शकटश्चैव श्येनश्श्येनमुखस्तथा।
मार्जारो वल्गुवल्वा च गुप्तः कणवकः कणः।।
शेषो विशेष उच्छेषः कर्दमः पूतिविग्रहः।
साम्बस्साम्बत्सरश्चैव वेगी वेगधरो मरुत्।।
गणाः पञ्चाशदेते तु सोमस्य दिशमाश्रिताः।
सुखस्य वशगा ह्येते राक्षसग्रहसंयुताः।।
सौम्यायां दिशि पञ्चाशद्भूतगणेभ्यो नमः।
ईशान ईश्वरो व्यापी व्यसनो विसनो वसुः।।
हरो वारो विशो पाशः शकुनिश्शकुनोऽवटः।
वृक्षः कक्षः क्षमश्शान्तिर्मरो मारी कविर्जविः।।
ब्रह्मज्ञो ब्रह्मविद् ब्रह्मी ब्रह्महा ब्रह्मसाधनः।
वेदी वेदविदुद्धर्षः शङ्करः शाङ्करस्तथा।।
धीमान्धीदृष्टिरिष्टात्मा दुष्टात्मा दुष्टकर्मकृत्।
विनतो विकचो वादी वेनो दिवक एव च।।
सर्वभृत्सर्वगस्सर्वस्सर्वभागी सनातनः।
गोविन्दो गोपतिर्गोप्ता ऐशानीं दिशमाश्रिताः।।
सुप्रतिष्ठवशा ह्येते पिशाचग्रहसंयुताः।
ऐशान्यां दिशि पञ्चाशद्भूतगणेभ्यो नमः।।

इति सप्तत्या तथेशाच्युत इत्यत्र द्वयेऽप्येकमन्त्ररूपेण प्रयोज्याः। यदुक्तं-'महाकालो विधाता चे'त्यादि। नित्ययोगः प्रसादनः। उत्कटः प्रकटश्चैवेत्यादि। कामभृत्काम(नाशनः ? शासनः)। "सप्ततिस्तु गणाः प्राच्यां हरनारायणस्य तु। प्राच्यां दिशि सप्ततिभूतगणेभ्यो नमः।।" इत्यादि। स्कन्ते तु-"इन्द्र ऐन्द्रेऽथ कुमुदः कुन्दरश्चाथ डम्बरः। आडम्बरश्च स्कन्दस्य पूर्वस्यां दिशि वै गणाः।। पूर्वस्यां दिशि षट्कोटिगणेभ्यो नमः" इत्यादि।

Shripuram Publications
www.shripuram.org

गणपतौ शास्तरि च ध्वजदेवताः कोटिगणाधीशाः एव। तदुक्तं-"एते कोटिगणाधीशा सम्पूज्यैषां बलिं क्षिपेत्।" ततश्च "पूर्वस्यां दिशि वज्रदन्तपार्षदेभ्यो नमः" इत्येवं बलिरिष्यत इति। इदानीं ये भूतादिमनुद्वयेन पृथगावृत्त्या गुहेऽत्रेत्युद्दिष्टं मनुद्वयमाह-—ये भूता स्कन्दसेनस्येति।।१५८-१८४।।

चाम्बादीनां गणाः सर्वे कोटिकोटिगणाधिपाः।
भवन्तु सहिताः सर्वे तेभ्यस्ताभ्यो नमो नमः।।१८५।।

'नमोऽस्तु भीमरूपेभ्यो भीमवक्त्रेभ्यो विविधाकृतिभ्यो वरदेभ्यश्च वो नमो नमः।'

'प्राग्गणेभ्यो बहुरूपेभ्यो विश्वरूपेभ्यः सद्भ्योऽसद्भ्यः सर्वगणेभ्यो नमो नमः।'

विमर्शिनी

आर्ये चाम्बादिमन्त्रचतुष्कं क्रमेण पठति-चाम्बादीनामित्यादि।।१८५।।

एष प्राग्गणमन्त्रोऽत्र प्राक्स्थाने दक्षिणेति च।
पश्चिमेत्युत्तरेत्यर्णं योजयेद् दक्षिणादिषु।।१८६।।

सर्वेभ्यः पिङ्गलेभ्यो महाशनेभ्यो घोररूपेभ्यो मृगयुभ्यो विनायकेभ्यो मूकेभ्यो बधिरेभ्योऽन्धेभ्यो जळेभ्यः स्थूलेभ्यः कृशेभ्यो दीर्घेभ्यो ह्रस्वेभ्यो नपुंसकेभ्यः[१] सद्भ्योऽसद्भ्यः सदसद्भ्यः सर्वगणेभ्यो नमो नमः स्वाहा।'

विमर्शिनी

तत्र तृतीये मन्त्रे विशेषमाह-एष इति। एष प्राग्गणमन्त्रः। अत्र प्राक्स्थाने प्रागित्येतस्य स्थाने दक्षिणादिषु दिक्षु दक्षिणेति पश्चिमेति उत्तरेति अर्णं योजयेत्।।१८६।।

विवरणम्

आर्ये चाम्बेत्यादिभिरित्युद्दिष्टं मनुत्रयमाह-चाम्बादीनामिति। द्वितीयमन्त्रेण

१. 'भ्यः स्त्रीभ्यः स' क. ख., 'भ्योऽस्त्रीभ्यः स' ग पाठः।

Shripuram Publications
www.shripuram.org

चतुर्दिक्ष्वेव बलिः प्रतिदिशं मन्त्रश्च भिद्यते एतद्दर्शयति-एष प्राग्गणमन्त्र इति ।।१८५-१८६।।

उत्सवार्थं गता ये च याश्च विघ्नप्रहर्षणाः।
'ॐ नमो विघ्नपार्षदेभ्यो[1] विघ्नपार्षदीभ्यो नमो नमः स्वाहा[2]।'

स्वनाममन्त्रगायत्रीतत्तन्मूर्त्यादिमन्त्रकैः।।१८७।।
सासङ्ख्यदेवतामूलैर्बलिपीठे बलिं हरेत्।

'हरिसेनाय विद्महे महाबलाय धीमहे। तन्नः शान्तः प्रचोदयात्।'
'अष्टमूर्तिपार्षदेभ्यः सद्भ्योऽसद्भ्यः सदसद्भ्यः सर्वगणेभ्यो नमो नमः स्वाहा।'

विमर्शिनी

विघ्ने उत्सवार्थमित्यादिमन्त्रं पठति।।

महाबलिपीठे भूतबलेर्विशेषमाह-स्वनामेति। स्वनाममन्त्रगायत्रीतत्तन्मूर्त्यादिमन्त्रकैः स्वनाममन्त्रेत्यनेन विष्णौ 'बलाय नमः' 'हरिसेनाय नमः' इति मन्त्रद्वयमुक्तम्। अन्येषु हरसेनादिस्वस्वनामैव। गायत्री लिख्यते। तत्तन्मूर्यादिमन्त्रकैरिति विष्णुदुर्गयोः 'अष्टमूर्त्या'दि, अन्येषु 'दशमूर्तिपार्षदेभ्यः सद्भ्यः' इत्यादि। सासंख्यदेवतामूलैः 'असंख्याता गणाः' इत्यादिना 'देवताभ्यः पितृभ्यः' इत्यादिना तत्तद्देवस्य मूलेन च बलिपीठे बलिं हरेत्।।

विवरणम्

उत्सवार्थमिति। विघ्न इति। उद्दिष्टं मनुमप्याह-उत्सवार्थं गता ये चेति। यावदेक

एवायं मन्त्र इति बोद्धव्यम्। महाबलिपीठे विशेषमाह-स्वनाममन्त्रेति स्वमन्त्रो विष्णौ 'बलाय नमः' इति। नाममन्त्रो 'हरिसेनाय नमः' इति। गायत्रीमाह-हरिसेनाय विद्महे इति।।१८७।।

तत्तन्मूर्त्यादिमन्त्रमाह-**अष्टमूर्तिपारिषदेभ्य इति।।**
असङ्ख्याता गणाः सर्वे कोटिकोटिगणाधिपाः।।१८८।।

---

१. 'भ्यो न' क पाठः। २. 'हा। ओं सर्वेभ्यो विघ्नपार्षदेभ्यो नमः। ख' ग पाठः।

Shripuram Publications
www.shripuram.org

विवरणम्

असंख्यमन्त्रमाह-असङ्ख्याता इति।।१८८।।

भवन्ति सहिताः सर्वे तेभ्यस्ताभ्यो नमो नमः।
देवताभ्यः पितृभ्योऽथ भूतेभ्यः सह जङ्गमैः।।१८९।।

एतत्स्थाननिवासिभ्यः प्रयच्छामि बलिं नमः।
'हरसेनाय विद्महे महाबलाय धीमहे। तन्नः शक्तिः प्रचोदयात्।'

'दशमूर्तिपार्षदेभ्यः सद्भ्योऽसद्भ्यः सदसद्भ्यः सर्वगणेभ्यो नमो नमः स्वाहा।'
ये समस्तं जगद् व्याप्य तिष्ठन्ति बलिकाङ्क्षिणः।।१९०।।

विष्णुपारिषदाः सर्वे गृह्णन्तु बलिमुत्तमम्।
'ओं नमो भूतेभ्यो भूतकृद्भ्यः सर्वेभ्योऽरिष्टकृद्भ्यः सद्भ्योऽसद्भ्यः सदसद्भ्यः सर्वगणेभ्यो नमो नमः स्वाहा।'
गृह्णन्तु बलिमेतत्तु बाह्यस्था विहगाननाः।।१९१।।

ये क्रूरा येऽल्पसत्त्वाश्च भूतप्रेतपिशाचकाः।
वेतालाश्चैव मातङ्गा हीनाहीनाश्च ये गणाः।।१९२।।

सर्वेषां चैव तेषां च हरामि बलिमुत्तमम्।
सर्वेभ्य एव तेभ्यश्च सगणेभ्यो नमो नमः।।१९३।।

इति।

विमर्शिनी

तान् मन्त्रान् क्रमेण पठति—हरिसेनाय विद्महे इत्यादि।।

पुनः ये समस्तमित्यादिमन्त्रत्रयमेकावृत्तिबलिदानाय क्रमेण पठति—ये समस्तमित्यादि, ओं नमो भूतेभ्य इत्यादि, गृह्णन्तु बलिमेतत् तु

इत्यादि।।१९०-१९३।।

Shripuram Publications
www.shripuram.org

विवरणम्

देवतामन्त्रमाह-देवताभ्य इति। पुनर्मूलमिति शिवे 'हरसेनाय नमः' इति स्वमूलमन्त्रः। 'महाबलाय नमः' इति नाममन्त्रः।।१८९।।

गायत्रीमाह—हरसेनायेति।।

तन्मूर्त्यादिमन्त्रमाह—दशमूर्तिरिति। शेषं समानम्। दुर्गादिषु गायत्र्यादिनावगम्यत इति। इदानीमथ ग्रहोपान्ततः सर्वत्र एकपरिक्रमादित्युद्दिष्ट मन्त्रत्रयं पठति-ये समस्तमिति। पुनर्देवग्रहादिबलिरन्ते क्षेत्रपाले संस्थापनञ्चेति।।१९०-१९३।।

प्रोक्तक्रमेण सकलं बलिपीठवर्जं
क्षेत्राधिपालबलिकर्मयुतं विधाय।
स्वावारवीतमभिपूज्य च पीठमध्ये
[१]पीठाधिपं विधिवदत्र समापयेद् वा।।१९४।।

विमर्शिनी

अत्र भूतबलावुत्सवबलावपि क्रियाक्रमे पक्षभेदमाह—प्रोक्तक्रमेणेति। बलिपीठवर्जं सकलं कर्म क्षेत्राधिपालबलिकर्मयुतं प्रोक्तक्रमेण विधाय स्वावारवीतं स्वावरणपरिवृतं पीठाधिपं पीठमध्ये (विधिवत्) अभिपूज्यात्र समापयेद्वा।।१९४।।

विवरणम्

केषाञ्चिदिह महाबलिपीठे संस्थापनमित्याह-प्रोक्तक्रमेणेति। स्वावारवीत[२]मिति। विष्णौ 'ये भूताः पुरस्स[३]दः' इत्यादीनामपि ग्रहणं कृतमिति ज्ञेयम्। विधिवदिति स्वनाममन्त्रगायत्रीत्याद्यभिप्रायम्। यद्वा पात्रशेषविनियोगाभिप्रायम्। नित्यबलौ भूतबलौ च तेषामेव प्रयोग इति।।१९४।।

बलिं विधायेति परीत्य सन्नतः
स्वाचम्य गर्भालयमभ्युपेत्य च।
आयोज्य देवं बलिबिम्बसंस्थितं
स्वमूलबिम्बे तमथ क्षमापयेत्।।१९५।।

---

१. 'भुताधि' ख पाठः। २. 'पीठमि' क पाठः। ३. 'र' च पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

इति उक्तक्रमेण बलिं विधाय परीत्य प्रदक्षिणीकृत्य सन्नतः सम्यङ् नमस्कृत्य स्वाचम्य गर्भालयमभ्युपेत्य बलिबिम्बसंस्थितं देवं स्वमूलबिम्ब आयोज्याथ तं क्षमापयेत्।।१९५।।

विवरणम्

अथ यत् प्राग्बलिकर्मारम्भ उक्तं 'सम्प्रार्थ्य देवं बलिकौतुके स्वे संयोज्ये'त्यादि तस्य विपर्ययप्रयोगमवसानेऽभिधत्ते—बलिं विधायेतीति।।१९५।।

इत्युत्सवं त्रिषवणार्चितदेवदेव-
भूदेवदेवपरिषत्प्रकराभिरामम्।
आतोद्यवाद्यबहुलोज्ज्वलदीपदीप्रं
कुर्वीत सर्वदिवसेषु सुभावितात्मा[1]।।१९६।।

विमर्शिनी

उत्सवं विशेषेण सादरं कर्तव्यमाह—इत्युत्सवमिति। सुभावितात्मा सुतरां भावित उद्योजित आत्मा मनो यस्य सः आचार्यः सर्वदिवसेषु उत्सवान्तर्भूतेषु सर्वेषु दिवसेष्वपि इति उक्तप्रकारेण त्रिषवणार्चितदेवदेवभूदेवदेवपरिषत्प्रकराभिरामं सवनत्रयेऽप्यर्चितेन देवदेवेन देवानामिन्द्रादीनामपि देवेन विष्ण्वादिना तथार्चितैर्भूदेवैर्ब्राह्मणैः तथाचार्चितेन देवस्य परिषत्समूहेन चाभिरामं मनोहरम्, आतोद्यवाद्यबहुलोज्ज्वलदीपदीप्रं च आतोद्येन वीणादिना तथान्यवाद्यविशेषैर्बहुलैरुज्ज्वलैर्दीपैश्च दीप्रमतिशयेन प्रकाशनशीलमुत्सवं कुर्वीत।।१९६।।

विवरणम्

उत्सवमिति। यथोक्तोत्सवबलिप्रकरणोपसंहारः। भूदेवदेवाः ब्राह्मणाः तेषां पूजाङ्गतया भोजनाभिप्रायमेतत्। सुभावितात्मेति प्रतिदिनं पूजाद्यावृत्तावप्येकसपर्या-प्रतिमानिनिति भावः।।१९६।।

---

१. 'समाहिता' क पाठः।

Shripuram Publications
www.shripuram.org

तीर्थस्नानदिनाधरेद्युरभिसायं सोऽयमाचार्यको
ग्रामे चैत्यचतुष्पथादिषु बलिं कुर्वन् परीत्याखिले।
ग्रामान्ते मृगयाप्रचारविहृतिं कृत्वा सुयोधैः समं
प्रत्यापत्य ततः स्वकौतुकगतं मूले समायोजयेत्।।१९७।।

विमर्शिनी

ततः तीर्थस्नानदिनाधरेद्युः तीर्थस्नानदिनात् पूर्वेद्युः अभिसायं सायन्तनबलिकाले सोऽयमाचार्यकः स्वमेवाखिले ग्रामे चैत्यचतुष्पथादिषु चैत्यं प्रसिद्धाश्वत्थादिवृक्षस्थानं चतुष्पथं चतुर्णां पथां सङ्गमः, आदिशब्देन विशेषस्थानान्तराण्युच्यन्ते, तत्र तत्र बलिं कुर्वन् परीत्य परितो गत्वा ग्रामान्ते ग्रामसमीपस्थवने सुयोधैः सुप्रसिद्धैर्योद्धृभिः समं सह मृगयाप्रचारविहृतिं तीक्ष्णमृगहननादिक्रीडां कृत्वा प्रत्यापत्य पुनः स्वस्थानमागम्य ततः स्वकौतुकगतं देवं मूले मूलबिम्बे समायोजयेत्।।१९७।।

विवरणम्

तीर्थस्नानदिनाधरेद्युरिति [१]ग्रामबलिमृगयाभिधानम्। क्षिप्रबल्यनन्तरं गोपुराद्बहिर्निष्क्रम्य मन्त्रौ शार्ङ्गिणीत्यादिमनुभिश्चैत्यचतुष्पथादिषु बलिं दद्यात्। सरोवनग्रामान्तसीमादीनामादिशब्देन ग्रहणम्। मृगयाप्रचारविहृतिस्त्वेवं दिवैव वा स्यात्। प्रत्यापत्येति। बलिं विधायेति परीत्येत्युक्तरीत्या प्रासादं प्राप्येत्यर्थः। ग्रामबलौ तु शार्ङ्गिणी मन्त्रावित्येवं योजनीयं वा।।१९७।।

मन्त्रौ शार्ङ्गिणि विष्णुपारिषदमात्रर्णादिकौ तौ शिवे
स्यातां ग्रामहबलौ तु रुद्रपदभिन्नौ वा नमो भूतकः।
गृह्णन्त्वीशहरौ निसुम्भजिति हृद्भूतादिगृह्णन्त्वणू
गृह्णन्त्वाद्यणवो गुहे प्रमथनाथे पिङ्गलाद्यस्तथा।।१९८।।

तत्र ग्रामबलौ शार्ङ्गिणि विष्णुपारिषादमात्रर्णादिकौ 'विष्णुपारिषदेभ्यश्च' 'मातृभ्यस्तद्गणेभ्यश्च' इत्यादिकौ मन्त्रौ स्याताम्। शिवे रुद्रपदभिन्नौ, विष्णुस्थाने रुद्रपदयुक्तौ, 'ओं नमो भुतेभ्यः' इत्यादि वा। ईशहरौ 'गृह्णन्त्वि'ति। निसुम्मजिति

---

१. 'या' क पाः।

Shripuram Publications
www.shripuram.org

हृद्भुतादिगृह्णन्त्वणू 'ओं नमो भुतेभ्यः' इत्यादि 'गृह्णन्तु बलिमि'त्याद्यं च। गुहे गृह्णन्त्वाद्याणवः 'गृह्णन्त्वि'त्यादि, 'ग्रामपर्वतवन' इत्यादि, 'नमोऽस्तु सिन्धुचारिभ्यः' इत्यादि, 'शून्यग्रामनिवासिभ्यः' इत्यादि मनवः। प्रमथनाथे तथा प्रिङ्लाद्यश्च 'ओं ध्रूं नमः सर्बेभ्यः पिङ्गलेभ्यः' इत्यादि।।१९८।।

विवरणम्

नमो भूतक इति। 'ओं नमो भूतेभ्यः' इत्येष एव वेत्यर्थः। हृद्भूतादीति। 'ओं नमो भूतेभ्यः' इत्यस्यैव ग्रहणम्।।१९८।।

विष्णुपारिषदेभ्यश्च प्रमथेभ्यो नमो नमः।
मातृभ्यस्तद्गणेभ्यश्च सर्वेभ्यो वै नमो नमः।।१९९।।

'ओं नमो भूतेभ्यो भूतकृद्भ्यः सर्वेभ्योऽरिष्टकृद्भ्यः सद्भ्योऽसद्भ्यः सदसद्भ्यः सर्वगणेभ्यो नमो नमः स्वाहा।'

गृह्णन्तु बलिमेतत् तु बाह्यस्था विहगाननाः।
ये क्रूरा येऽल्पसत्त्वाश्च भूतप्रेतपिशाचकाः।।२००।।

वेतालाश्चैव मातङ्गा हीनाहीनाश्च ये गणाः।
सर्वेषां चैव तेषां च हरामि बलिमुत्तमम्।।२०१।।

सर्वेभ्य एव तेभ्यश्च सगणेभ्यो नमो नमः।
'ग्रामपर्वतवनचारिभ्यो नमो नमः।'

नमोऽस्तु सिन्धुचारिभ्यश्चतुष्पथगताय च।
शून्यागारनिवासिभ्यः सर्वेभ्यो वै नमो नमः।।२०२।।

विमर्शिनी

तान् मन्त्रान् क्रमेण पठति—विष्णुपारिषदेभ्य इत्यादि।।१९९-२०२।।

विवरणम्

गृह्णन्त्वाद्यणवो गुह इत्युद्दिष्टान्मन्त्रानाह-गृह्णन्त्विति।।१९९-२०२।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

शून्यग्रामनिवासिभ्यो वृक्षगुल्मगताय च।
देवागारनिवासिभ्यो भूतेभ्यश्च नमो नमः।।२०३।।

'ओं घ्रुं नमः सर्वेभ्यः विङ्गलेभ्यो बहुरूपेभ्यो महागणेभ्यो घोरे[1]रूपेभ्यो मृगयुभ्यो विनायकेभ्यो बधिरेभ्योऽन्धेभ्यो जळेभ्यः स्थूलेभ्यः कृशेभ्यो दीर्घेभ्यो ह्रस्वेभ्यो मुण्डेभ्यः स्त्रीभ्यो नपुंसकेभ्यो बहुरूपेभ्यः सद्भ्योऽसद्भ्यः सदसद्भ्यः सर्वगणेभ्यो नमो नमः।' इति

बलिं दत्त्वा यथान्यायं शेषं शुद्धे तु भूतले।
नमः पारिषदेभ्यश्चेत्युक्त्वान्ते निक्षिपेद् गुहे।।१०४।।

विमर्शिनी

गुहे तु यथान्यायं बलिं दत्त्वा शेषं हविः शुद्धे भूतले 'नमः पारिषदेभ्यश्च' इत्युक्त्वा निक्षिपेत्।।२०४।।

अथाप्लुतो मङ्गलपालिकादिभिः
स्वलङ्कृते तत्र निषद्य मण्डपे।
समर्चितात्मा शयने प्रसाधिते
यथापुरं पीठमपि प्रपूजयेत्।।२०५।।

विमर्शिनी

अथ बलिदानानन्तरम् आप्लुतः स्नात्वा मङ्गलपालिकादभिः स्वलङ्कृते तत्राग्रगते मण्डपे निषद्य समर्चितात्मा सकलीकरणशङ्खपूरणात्माराधनकृद् भूत्वा यथापुरं प्रतिष्ठायाः पुरस्तादधिवासनमण्डपे यथा तथा शयने प्रसाधिते सति पीठमपि प्रपूजयेत्।।२०५।।

विवरणम्

प्रमथनाथे पिङ्गलाद्यथेत्यमुं मन्त्रमपि पठति— ओं घ्रुं नम इत्यादि। इति।

उक्तोऽयमुत्सवः सर्वः स्वापनावभृथावथ।
वाच्याविहान्तरा किञ्चित् प्रसङ्गात्कर्म कीर्त्यते।।

---

१. 'रेभ्यो' ख पाठः।

Shripuram Publications
www.shripuram.org

भेदो विजयबल्यादावुक्तोत्सवबलेरिह।
स्वल्प एव ह्यतोऽस्योक्तौ लाघवानुग्रहौ स्फुटम्॥

इति।

विजयबलिप्रमुखैरथ यजनविशेषैः स्वकल्पसङ्कथितैः।
विष्ण्वादीनिह चतुरो यजेत देवान् स्वपञ्चमीसमये॥

इति। विष्णौ विजयबलिः। शिवे जयाबलिः, दुर्गायां दुर्गाबलिः, स्कन्दे कौमारबलि इति। स्वपञ्चमीसमय इति पुर्वपक्षपञ्चमी विष्णुपञ्चमी अपरपक्षपञ्चमी च रुद्रपञ्चमी। पञ्चमीशब्दश्चेह[१] तत्सदृशदिनान्तरेष्वपि प्रयोगविद्भिः प्रयुक्तः।

अष्टमीद्वयचतुर्दशीद्वयार्द्रासु रुद्रमथ पर्वयुग्मके।
द्वादशीश्रवणभे च शार्ङ्गिणं पुजयेदिह विशेषतो बुधः॥

पञ्चमीषु शिवकीर्तितासु वा स्थाणुविष्णुमजितेरितासु वा।
अर्चयेत नवमीचतुर्दशीकृत्तिकासु माहिषासुरद्विषम्॥

षष्ठीचतुर्दश्यनलर्क्षकेषु षडाननं रुद्रसमीरितासु।
विघ्नं चतर्थीसितवारयोरप्यार्यं भगर्क्षा[२]सितवारयोश्च॥

इति। विषुवायनादिकालोऽपीष्यत एव। यद्युत्सवमध्ये विजयबलिर्जयाबलिर्वा तदौत्सवाविरोधेन स कार्यः। निशि भुतबलिं द्रुतं विधाय पुनर्हविस्संस्कृत्यामुं बलिं विदध्यात्। तदा च वाद्यपूजोत्सवारम्भदिन एव कार्य। यदि हि नोत्सवो तदा पूर्वं देवस्य शुद्धिं कुर्यात्। तदुक्तं—'वैशेषिकयजनविधौ विशेषतः शुद्धिरादितः कार्या'। इति।

पूर्वेद्युर्निशि देवदेवमभिपूज्याज्ञाप्य नीत्वा निजां
कर्मार्चां बलिपीठिकाबहिरिहार्चावन्निधायार्प्य च।
भेर्याद्यं पुरतो निधाय सहकोणं प्राच्र्य सन्ताडयन्
भूतामन्त्राणकर्म तेन तनुयात् त्रिः शब्दतत्त्वं जपन्॥

इति। पूर्वेद्युर्निशि देवदेवमभिपूज्येति यजनीयदिनाधरेद्यू रात्रौ कलशाभिषेकपूर्वकं केवलं वा स्वमूलमन्त्रविधानेनानुज्ञापूजोक्ता। विष्णौ षडक्षरविधानं भवति तदा च

१. 'श्चैतत्स' क पाठः। २. 'क्षार्कजवा' क पाठः।

Shripuram Publications
www.shripuram.org
www.shripuram.org

जनितेऽग्नावधिवासहोममात्रमेकविप्रभोजनमपि युक्तमिति। इहार्चावन्निधायेत्यष्टदलकमले पीठं व्रीहिवस्त्रादिभिर्विरचय्य तत्र बहिर्मुखतया निधायेति भावः। ध्वजे सति तत्सम्मुखीयं भवति। यदुक्तं—

ध्वजपीठस्य पुरतः कृत्वा गोमयवारिणा।
आलिप्य चतुरश्रञ्च सुधाचूर्णेन शोभयेत्॥
चतुरश्रं धान्यपीठे द्रोणपञ्चकशालिनाम्।
कल्पयित्वा कालचक्रं तस्य मध्ये निवेशयेत्॥
बल्यर्थं चक्रमत्रैव स्थापयेद् ध्वजसम्मुखम्।
पूजयित्वा निवेद्याथ हवींषि विविधानि च॥
तदग्रे स्थण्डिले पद्मं विलिख्य शुभकर्णिकम्।
तत्र शूलं प्रतिष्ठाय यथावदभिपूजयेत्॥

इति। चक्रशूलग्रहणं बलिबिम्बविकल्पोपलक्षणम्। भेर्याद्यं पुरतो निधाय सहकोणमिति। कोणस्तद्वादनदण्डः ध्वजान्तर्भाग एव। तदर्चाभिमुखतया स्वस्तिकपीठे वाद्यनिधानम्। यदुक्तं—

आलिप्ते पुरतस्तस्य भूतले धान्यपीठके।
तावदेव महाभेरीं वेष्टितां नववाससा॥

इति। शब्दतत्त्वं जपन् त्रिः सन्ताड्यंस्तेन भूतामन्त्रणकर्म तनुयादित्यन्वयः।

मुहूर्ते शोभने भेरीं शब्दतन्मात्रविद्यया।
कोणेन ताडयेन्मूर्ध्नि त्रयं ध्यायन् गुरुः स्वयम्॥

इति। 'ओं नमः पराय शब्दतन्मात्रात्मने नमः। ओं हं नमः पराय शब्दतन्मात्रात्मने नमः' इति वा[1] मन्त्र इति। शिवे तु विशेषः।

ततस्त्रियम्बकाद्येन मन्त्रेण प्रथमं गुरुः।
कोणेन ताडयेद् भेरीमिदं विष्ण्वादिना ततः॥
तृतीयं ब्रह्मजज्ञानमनुनैव तु ताडयेत्।

इति। वाद्यपूजाप्रकारस्तूच्यते।

१. 'नामम' ङ पाठः।

Shripuram Publications
www.shripuram.org

पीठाराधनकृत्स्वबीजमनुस्तच्छक्तितश्च क्रमात्
कृत्योर्दक्षिणवामपुष्करजुषोर्गौण्या प्रकृत्या तथा।
तद्रज्ज्वामथ शक्तितः समभिबाह्याराध्य भेरीमुखे-
भ्यर्हेच्छाब्दिकतत्त्वतः प्रणवतः कोणेऽपि वाद्यार्चने॥

इति। वाद्यानामस्त्रप्रोक्षणादि सर्वं सामान्यसिद्धम्। शक्तेरेव पीठमाराधनीयम्। स्वबीजमनुत इति विष्णुबीजाभिप्रायम्। तच्छक्तितश्चेति श्रीबीजाभिप्रायम्। कृत्तिरिति पिधानचर्मोच्यते। तत्र तद्रज्ज्वामिति तन्मध्येऽपीति वा पठनीयम्। यदुक्तं—

"त्रिगुणां प्रकृतिञ्चैव मध्यभागे सभाजयेत्।'

इति। शैवे भेदः

रुद्रं दक्षिणतो भेर्यां वामतस्तु जनार्दनम्।
मध्ये ब्रह्माणमाराध्य कोणदण्डे गुहं यजेत्॥

इति। भेरीमुखं दक्षिणकृत्तिरेव। सा च तदा देवसम्मुखी वा कार्या। युदुक्तं— भेरी तु सकलवाद्याग्रतः स्थाप्या। तस्या दक्षिणकृत्तिस्तु देवसम्मुखतया देवदक्षिणभागतया वा स्यात्। तत्सन्निधौ तदीयः कोणश्च निवेशनीय इति। त्रिस्ताडयन्निति मन्दमध्य-विलम्बिताद्यभिप्रायमिति।

वाद्यैः पञ्चभिरञ्चितैरिति कृतस्नानादिका वादकाः
वाद्येऽन्तश्च समाहतैस्तदुपहूतिं भाविदण्डक्रमात्।
कुर्युः पर्ययणक्रमात् समुपहूता देवताः प्रीणयेत्
पुष्पैर्देवसमक्षमेष्यति बलौ सोपक्रमं ज्ञापयेत्॥

इति। समाहतैरिति त्रिविधपाण्याभिप्रायम्। एष्यति भाविनि घोषयेत् 'घोषयेद् गुरुणेन्द्रादौ हूयमाने मरुद्गणे' इति चोक्तम्। ततश्चैवमिह क्रमः स गुरुर्वाद्यं पारशवे दत्त्वा देवपरिवारदेवतानामन्येषाञ्च ब्रह्मविष्णुरुद्रादीनां सावरणानामाह्वानं भावनीयम्। तदाह्वानभावनासमये पारशवेन वाद्यं वादनीयम्। तदवसाने चाहूतानामर्हणपूर्वकं स्वोपक्रमज्ञापनमिति। कर्मार्चास्थं देवं मूलार्चायां नियोज्य यज्वा अथ कलशेज्यादिकमखिलं तद्रजनीसमुचितं चरेत्। कर्मेति परेद्यवि माध्यन्दिनाभिषेकार्थं द्रव्यकलशपूजा

Shripuram Publications
www.shripuram.org

तदधिवासहोमश्च त्रिषवणपूजाङ्गतयाधिवासहोमकृतेऽग्रमण्डपादौ कृते कुण्डेऽग्निजननञ्चोक्तमिति।

स्वपञ्चम्यां स्नातो विधिविहितनित्यस्त्रिषवणे-
ष्वथाभ्यर्चेद् देवं बहुलविलसद्भक्तिविभवैः।
निजे बिंबे वह्नौ द्विजवरमुखे चोपहितया
स्वमूर्त्या तिष्ठन्तं स्वसमयसमिज्योक्तमनुभिः।।
नादब्रह्म[1]षडक्षरैः स्मररिपौ सूर्याष्टषड्वर्णकै-
र्लक्ष्मीशे महिषद्विषि त्रिषवणेज्यां वैदिकैस्तान्त्रिकैः।
मिश्रैश्च क्रमतः करोतु मनुभिः स्कन्दे तमर्वन्तमि-
त्याद्यृक्पञ्चकमूलकोपचरणाख्यैर्मूलतो वाखिले।।

इति। सर्वपूजास्वपि तत्तन्मन्त्रपूजितनवकादिकलशैः स्नपनमपि कार्यमिति।

त्रिकालपूजामनुभिश्च तत्तत्काले चतुर्द्रव्यहुतिं विधाय।
प्रसन्नपूजावसरेऽर्पयेत्तत्सम्पातसर्पिर्मनुबिम्बमूर्ध्नि।।

इति। सम्पातस्पर्शं कृत्वा वा देवस्य पानीयादिसमर्पणं स्यादिति।

प्रातर्हरौ पौरुषजैर्जुहोतु मध्येऽह्नि नारायणजैश्च सर्पिः।
प्राग्द्रव्यहोमान्मनुभिस्त्वतो देवाद्यैश्च विष्णोर्न मुखैश्च सायम्।।
वैदिकदुर्गामनुभिर्हुत्वाष्टोर्ध्वं शतं घृतं पूर्वम्।
समिदादिकं कुमार्यां हुनेत् स्वमूलेन सर्वदा वेह।।
स्कन्दे जुहोतु सर्पिस्तत्र तमर्वन्तमादिपञ्चकतः।
तदनु कुमारं माताद्विकयस्मिन्वृक्ष आदिपञ्चकतः।।
मूलमनुद्वयषट्कद्विषट्कनामाणुदेवसेनाद्यैः।
मन्त्रैश्च द्रव्यहुतेः प्रागिह सर्वेषु सवनेषु।।

इति। मूर्तिप एवाधिवासहोमं कुर्यात्। तदा चतुर्द्रव्यहोमे कृते गुरुः स्वयं तस्मिन्नग्नौ पूजावैश्वदेवहोमं कुर्यात्। पुनः स मूर्तिपो होमशेषं समापयेदिति।

---

१. 'समाक्ष' क पाठः।

Shripuram Publications
www.shripuram.org

विप्रान्समभ्यर्च्य च केशवाद्यैस्सम्भोजयेद्द्वादशशस्त्रिधाम्नि।
तद्वत् कुमार्यां[1] सवनत्रयेऽपि षट् षट् षडास्ये मनुभिश्च षड्भिः।।

इति। शिवे नास्त्यधिवासहोमः। अथवास्त्येव। तदुक्तं—

अग्निमुत्पाद्य हुत्वाग्नौ पक्वमाज्यञ्च पञ्चभिः।
अपामार्गसमित्सर्पीरन्नमाज्यं शतं शतम्।।
नादेनाष्टाधिकं हुत्वा होमशेषं समाप्य च।

इति। "मध्याह्ने यागहोमादि पूर्ववत् ब्रह्मभिश्चरेत्। उदुम्बरभवैस्तद्वद्रात्रौ होमं तु पाटलैः। यागहोमादिपञ्चार्णैः' इति विप्रांस्त्वैकादश भोजयेत्। दक्षिणामपि शक्तितो दद्याद् इति।

अथ व्यतीते निशि याममात्रे बलिं समारभ्य समापयेच्च।
ब्राह्मे मुहूर्ते विधिरुत्सवोक्तः प्रायोऽत्र भेदं कथयेऽजितादौ।।

इति।

देवं सायन्तनेज्यासमुदितमनुनान्तस्सतत्प्रोक्तमूर्ति-
श्रीभूब्रह्मत्रिदौवारिकमथ पुरुषादीन् बहिस्सार्यकादीन्।
वाहाद्यादिक्पतत्पारिषदमथ स तत्रत्यवास्तुस्थदण्डं
स्कन्दाद्यावारकञ्च प्रयजतु बलिनान्तस्सचाम्बादिदण्डम्।।
द्वाःस्थानग्रगतान् बहिश्च विकटादीनन्तहारा चतु-
र्दिग्द्वाःस्थान् कुमुदादिदिश्यमनुनिष्ठावारकांस्त्रीनपि।
ये भूतादिकदण्डपूर्वबलिपीठास्त्राष्टकाणुस्त्रयी
शर्वस्कन्दसुरग्रहाद्यमखिलं श्रीशे बहिश्चार्चयेत्।।

इति। विष्णौ सायन्तनेज्यामनुः षडक्षरः। अन्तरिति गर्भगृहे तत्प्रोक्तमूर्तयो वासुदेवादयः। पुनरभितः श्रीः भूमिश्च, पुनर्ब्रह्मा स च वास्तुदेवतैव, पुनस्त्रिदौवारिकाः द्वाःस्थयुगलत्रयं तैः सहितं देवं प्रयजत्विति सम्बध्यते। गुरुः स्नानादि कृत्वोत्सवोक्तवद्धविः सम्पूज्य पारशवैर्वाद्यघोषणे कृते अन्तः प्रविश्य पीठमिष्ट्वा षडक्षरेण देवमावाह्य

---

१. 'कुर्यात् स' पाठः।

Shripuram Publications
www.shripuram.org

व्यापकाङ्गन्यासं विधायं विग्रहपूजां कृत्वा बिम्बाग्रतस्[1]तले षडक्षरेण सप्तवारमेकविंशतिवारं वा दैविकेन हविषा बलिं दद्यात्। पुनस्तत्पारिषदेभ्यो नम इति तत्पार्श्वे सम्पूज्य त्रिवारं सप्तवारं वा बलिं दद्यात्। तदुक्तं—

देवाग्रे विष्णवे तस्य परिषद्भ्यो ब्रह्मणे हरेत्।

इति। परिषदः पृथग्वा पूज्याः। तत्प्रोक्तमू[2]र्तिरित्यभिधानात्। वासुदेवादिभिः केशवादिभिश्च यथास्थानं सम्पूज्य त्रिस्त्रिः बलिं दद्यात्, इति। 'ओं श्रियै नमः ओं पुष्ट्यै नमः' इति। देवदक्षिणवामयोः श्रीभूमी सम्पूज्य सप्तवारं वलिं दद्यात्। पुनस्सकृज्जलं दत्त्वा देवस्य गण्डूषादि दत्त्वा किञ्चित्सम्पूज्य षडक्षरेण पुष्पाञ्जलिं विधाय 'सृष्टिस्थितिविनाशाना'मिति प्रार्थ्य ब्रह्मादिभ्यो बलिं हरेत्। देवबलिस्थानात् पुरतःस्थल एव ब्रह्माणं स्वेन षडक्षरेण द्वादशाक्षरेण वा सम्पूज्य सप्तवारं बलिर्देयः। पुनस्त्रिर्दौवारिकबलिः।

गर्भभुवि नन्दकुमुदौ द्वाःस्थौ हरिसम्मुखाविहाद्यौ स्तः।
आनन्दनन्दनाख्यौ प्राग्वत् चण्डप्रचण्डौ च।।

इति। ब्रह्मयजनानन्तरं तत्रैव बहिर्मुखस्तिष्ठन् गर्भगृहान्तर्द्वाःस्थाभ्यां नन्दकुमुदाभ्यां स्वनाम्ना सम्पूज्य बलिं हरेत्। वासुदेवताव्यतिरिक्तानां तत्पारिषदयोगः सर्वत्रावबोद्धव्यः। बलिदानप्रक्रिया तु पुरोक्तैव। पुनर्गर्भगृहान्निष्क्रम्यान्तरालद्वार्यन्तर्मुखस्तिष्ठन् आनन्दनन्द[3]नाविष्ट्वा मुखमण्डपद्वार्यन्तर्मुखस्तिष्ठन् चण्डप्रण्डौ पूजयेत्। तयो'र्नमस्ते द्वारपालाये'त्युपस्थानं पुरोक्तमेव। अन्तराळाभावे नास्त्यानन्दनन्दनबलिः। मुखमण्डपाभावे तु प्रासादद्वारबहिरेव चण्ड[4]प्रचण्डबलिः स्यादिति। अथ पुरुषविश्वसत्या वैकुण्ठाच्युतकसर्वरूपाश्च। अनिरुद्धविश्वभावनयुक्ता जगती बहिस्वपारिषदैः।। इति। सार्यकादीन्पुरुषादीनिति ह्युक्तः। ततश्चैवं प्रयोगः। चण्डप्रचण्डयोर्मध्ये पुरुषं सपारिषदमिष्ट्वा तस्य सन्निधावेव दक्षिणत आर्यकं यजेत्। पुनर्मुखमण्डपबहिर्निष्क्रम्याग्निकोणे जगतीक्षेत्रबाह्ये विश्वं सपारिषदं इष्ट्वा तयभितः पार्श्वयोस्सावित्रसवितारौ यजेत् प्राग् उक्तम् आर्यकसावित्राख्यावित्यादि। एवं सत्यविवस्वदादिशेषो बोद्धव्य इति। गर्भावरणमेतत्। यदुक्तं-

---

१. 'स्थ' क पाठः। २. र्तीत्य' ख. च पाठः। ३. 'न्दावि'। ४. 'ण्डब' ख पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

दद्याच्च पुरुषार्याभ्यां बलिञ्चैव पुरोमुखे।
सावित्राय सवित्रेऽग्नौ विश्वमिष्ट्वास्य पार्श्वयोः।।

इत्यादि। वाहाद्यादिक्पतत्पारिषदमित्युत्सवोक्तवदिति शेषः। पूर्वद्वार इन्द्रान्तर्भागेन पश्चिमद्वारे वरुणबहिर्भागेन गत्वा मण्डपे गरुडं यजेत्। पक्षविक्षेपेत्यादि, पुनः प्रासादपृष्ठदेशं प्राप्य प्राग्द्वारेऽच्युतमित्रयोः, प्रत्यग्द्वारे पुरुषार्यकयोर्मध्येऽनन्तं यजेत्। विवस्वत्सयोरपि पार्श्वभागे गणपतिदक्षिणामूर्ती भवतः। सोपानमारुह्य चक्रपाणिं शङ्खपाणिञ्च सम्पूज्य पुनरिन्द्रं यजेत्। 'दैत्यदर्पविनाशाये'त्यादि। अथ स तत्रत्या वास्तुस्थदण्डमिति कथमित्यत उच्यते-

तत्तद्दिगीशद्वयमध्यसंस्थचतुश्चतुर्वास्तुसुरान् समर्च्य।
सप्तवारं दण्डवदों नमो भूताद्येन दद्याद् बलिमन्तराले।।

इति। इन्द्रतत्पारिषदपूजानन्तरमिन्द्राद्यग्न्यन्तान्तरालं फडन्तप्रणवेन प्रोक्ष्य चत्वारि वास्तुपदानि संविभज्यादिचतुर्वास्तुदेवतास्तेषु संपूज्य बलिं दत्त्वा पुनरिन्द्राद्यग्न्यन्तं पुष्पाराधनादि सर्वं विधाय 'ओं नमो भूतेभ्यः' इति मालामन्त्रेण त्रित्रिवारं जलादिभिः संपूज्य सप्तवारमिन्द्राद्यग्न्यन्ततया दण्डाकारेण बलिं विदध्यात्। हविश्शेषेण दण्डमुच्छ्रिततया पूरयेत्। पुनर्मूलेन सकृत्तदुपरि विकिरणं सकृज्जलदानं[1] कुसुमदानं बलिमुद्रामञ्जलिञ्च इन्द्राद्याग्न्यन्तं विदध्यादिति। एवमग्न्यादिष्वपि[2] द्रष्टव्यमिति।

सत्यादिक्लृप्तेन पथा सुरादिक्लृप्तेन वेत्वा परिपूर्य दण्डं।
इष्ट्वा बहिष्ठानखिलानुपेत्य प्रोद्वास्य तेनैव पथान्तरे तु।।

इति। बहिरवस्थितेन बलिदानेन मार्गानपेक्षा अन्तरवस्थितेन बलिदानेन पूर्वद्वारे आदित्यसत्यमध्ये मार्गः। प्रत्यग्द्वारे वरुणासुरमध्ये मार्गः। प्राग्द्वारे वास्तुदेवताचतुष्कमिष्ट्वा दण्डसमये त्विन्द्रबलिपीठाद्यादित्यसत्यमध्यमार्गोदवसीमपर्यन्तं तद्दक्षिणसीमाद्यग्नि-बलिपीठपर्यन्तञ्च तथाविच्छिन्नदण्डं विधाय पुनरीशानान्तबलिः। तदादीन्द्रबलिपीठान्तं दण्डञ्च विधाय तेन मार्गेण बहिर्निष्क्रम्य तमेव मार्गं तेनैव मन्त्रेण किञ्चित्सम्पूज्य तेनैव तं विच्छिन्नभागं पूरयेदिति। इष्ट्वा बहिष्ठानखिलानिति[3] स्कन्दादिविष्वक्सेनान्तब्रह्मा-नन्ताभिप्रायम्। प्रोद्वास्येति दण्डोद्वासनमुक्तम्। देवाग्रतो दण्डबहिः स्थित्वा मूलेनाभ्यर्च्य दण्डबलेन जलगन्धादिमुद्रां दर्शयन् सर्वं समर्प्य तदूनातिरेकशान्त्यर्थं गोदानं कृत्वा

१. 'नं ब' क पाठः। २. 'मिन्दादि' च पाठः। ३. 'ति ब्रह्मानन्तस्क' च पाठः।

Shripuram Publications
www.shripuram.org

प्रणवेन दण्डं, सर्वं तदीयभोक्तृभूतमुखे समुद्वास्य मार्गं विच्छिन्द्यात्। बल्यवसाने च तेन मार्गेण प्रासादान्तरियादिति। यद्वा बहिष्ठानखिलानिति स्कन्दादिक्षेत्रपालान्तं सर्वदेवताभिप्रायम्। सदा चान्तरा बलिसमापनपर्यन्तमवहितदृष्ट्यो रक्षका अपि कल्पनीया इति, प्रसङ्गादेवेदानीमेतदुक्तमिति[1] च बोद्धव्यमिति। ततः स्कन्दाद्यावरणं तदा चाम्बाद्याः पश्चिमे शास्तुरित्येतस्मिन्नवसरे 'चाम्बादीनां गणास्सर्व' इत्यनेन मन्त्रेण प्रागादिपश्चिमापवर्गं सम्पूज्य सप्तवारं शिंशुमाराकृतिरूपेण दण्डं विदध्यात्। शेषमुत्सवसमानम्। परीत्यार्चयतु च। पुन'रुदित्याञ्च निर्माल्यभाज'मिति विष्वक्सेनञ्च यजेदिति।

श्रीभूनिधियुगदण्डप्रदण्डकानथ गदाञ्च मुसलं च।
चक्रं शङ्खञ्च यजेत् पार्श्वयुगे मण्डपे सभायाञ्च॥

इति। मण्डपस्य बहिर्द्वारि देवाभिमुखः स्थित्वा 'श्रीयै नमः पुष्ट्यै नमः'। सभाद्वार्यन्तर्बहिर्मुखः स्थित्वा 'शङ्खनिधये पुष्पनिधये[2] नमः'। सभान्तः प्रविश्य देवाभिमुखः स्थित्वा 'दण्डाय नमः प्रदण्डाय नमः'। तयोः पुरतः समीपे 'गदायै नमः मुसलाय नमः'। सभाबहिर्द्वार्यन्तर्भागे बहिर्मुखः स्थित्वा 'चक्राय नमः शङ्खाय नमः'। पुनर्बहिर्निष्क्रम्यान्तर्मुखः स्थित्वा विकटविरूपाक्षौ पूजयेदिति। विकटविरूपाक्षसनातनसनकाः प्राच्यवाच्योः स्युः। शान्तप्रमोदसुखदाः[3] ससर्वदमनाः प्रतीच्युदीच्योश्चेति। अवाची दक्षिणा दिगुच्यते। सनातनसनकौ दक्षिणदिग्द्वारि बहिर्द्वाःस्थौ शान्तप्रमोदौ पश्चिमदिग्द्वारि सुखदसर्वमनौ उत्तरदिग्द्वारि बहिर्द्वाःस्थाविति द्वाःस्थावरणमेतत्। ततः।

आराध्य ध्वजदेवतादिबहिरावारद्वयं पूर्ववद्
विष्णौ दिग्गणमन्त्रतश्च दशदिक्ष्वत्राहरेद्वा बलिम्।

इति। तदुक्तं-'कुमुदादिदिश्यमनुनिष्ठावारकांस्त्रीनपी'ति। 'ये भूतादिकदण्डपूर्वबलिपीठे'ति, तत्प्रकारस्तूच्यते।

ये भूतादिकमनुभिर्नवभिर्बलिपीठिकां परीत्य गुरुः।
दद्यात् त्रिसप्तवारं दण्डवदथ शेषमाचरेत् प्राग्वत्॥

इति। महाबलिपीठसन्निधिमुपेत्य फडन्तप्रणवेन प्रोक्ष्य पुष्पाञ्जलिं कृत्वा पीठाधिपं संवन्द्य प्राग्दिशि कुमुदपीठबहिर्दक्षिणत उदङ्मुखः स्थित्वान्तरादि बहिरपवर्गं फडन्तप्रणव[4]प्रोक्षणादिसर्वं विधाय 'ये भूताः पुरस्सदः' इत्यनेनैकविंशतिवारं हस्तमात्रायतं

१. 'ति त' क पाठः। २. 'ये स' क पाठः। ३. 'मुखाः सर्व' क पाठः। ४. 'वेन प्रो' क पाठः।

www.shripuram.org
Shripuram Publications www.shripuram.org

दण्डं विदध्यात्। पुनरग्निकोणे प्राङ्मुखः स्थित्वा 'ये भूता अग्निसदः इत्यन्त[1]रादिबहिराग्नेयापवर्गं दण्डं विदध्यादित्यादि। ऐशदण्डादीषद् बहिर्दक्षिणभागे 'ये भूता उपरिसदः' इत्युपरिदण्ड इति। पुनः कुमुदाद्यष्टमूर्तिर्बलादिमन्त्रैरुपरिपीठे बलिश्चोत्सववदेव। पुनरायुधावरणम्।

शङ्खञ्चक्रञ्च गदा मुसलं शाङ्र्गं शरञ्च खड्गं च।
खेटकमपि विदुरस्त्राण्यष्ट प्रागादिदिक्स्थितानि हरेः।।

इति। पुनर्मन्त्रत्रयावरणं ये समस्तं ओं नमो भूतेभ्यः गृह्णन्त्विति यदुक्तं शङ्खाय दिक्षु चक्रायेत्यादि खेटकाय चेति गृह्णन्तु बलिमित्यादिमन्त्रेणापि तदैव हीति। पुनः शर्वस्कन्दाद्यावरणम्। तदुक्तं-

शर्वस्कन्दं विदारीञ्चा[2]प्यर्यमाख्यं च पूतनाम्।
जम्भकं राक्षसीं पापां पिलिपिञ्जं चरादिकीम्।।

इति। पुनर्देवग्रहादिबलिः। क्षेत्रपालबलिश्च पुनरुपेत्य प्रोद्वास्य तेनैव पथान्तरे त्विति बलिं विधायेति। परीत्य सन्नत इत्याद्युक्तं च कार्यमिति। येषान्तु बलिपीठे समा[3]पनं विजयबलिस्तावदेवमुक्तः। अथेतरबलिष्वत्रैवायं भेदः।

लक्ष्मीशेतरदेवतासु पुरुषाद्यैरूनितोऽन्तर्बहिः
शङ्खाद्यैश्च विधिस्त्वयं स्मरहरे वास्तुस्थितैश्चामरैः।
दुर्गायां बलिपीठिकार्चनविधौ शक्त्यात्मकैरष्टभि-
र्दण्डैस्तां परितोऽभिवेष्ट्य नवमं कुर्वीत शार्व्यां दिशि।।

लोकेशापचितौ निजोत्सवसमुक्तैस्सर्वमन्त्रैर्बलिं
दायं दायमिहोक्तदण्डयजनं कुर्यात्कृशानूद्भवे।
एतस्मिन्परितो ध्वजेशयजनेऽप्येतेन मालाणुना
कार्यो दण्डबलिर्जयाबलिसमूह्यश्चात्र शेषो [4]बलिः।।

सव्येऽभ्यर्च्य महेश्वरे परशुपाणिं शूलपाणिं यजेत्
वामेऽनन्तरमेव सोमयजनस्यार्थेश्वराभ्यर्चनम्।
चण्डेशं परिपूज्य वाहनसमिज्यां [5]चाचरेदग्रतो

१. 'राब' च पाठः। २. 'प्यार्यकाख्यं' क पाठः। ३. 'मानं... बलिपीठकार्चनविधौशक्यात्मकैरष्टमिर्दण्डैस्तां परि' च पाठः। ४. 'विधिः।' ख. च पाठः। ५. 'त्वा' च पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

दण्डेज्याबलिपीठयागविहिताः पञ्चैव चोर्ध्वान्तिमाः।।

इति। शिवदुर्गास्कन्देष्विह पुरुषाद्यावरणं शङ्खाद्यावरणञ्च नास्ति। दुर्गास्कन्दयोस्तु पुनः ब्रह्मार्यकादिवास्तुदेवतास्सन्ति। शिवे तु तासामप्यभाव इति तावद्भेदः। ततश्च दुर्गाबलौ तावत्सायन्तनेज्यामनुविधानेन देवीं सकळीकृत्य सम्पूज्य निवेद्य काले तन्मन्त्रैस्सप्तवारमेकविंशतिवारं वा तले बलिं विकीर्य गण्डूषादि दत्त्वा किञ्चित्सम्पूज्य पुष्पाञ्जलिं विधाय 'सृष्टिस्थितिविनाशाना'मिति प्रार्थ्य देव्यग्रतःस्थले ब्रह्माणं स्वद्वादशाक्षरेण यजेत्। पुनरुपस्थानादिपूर्वकं[१] चण्डिकाम्बिके जयाविजये च सम्पूज्यार्यकादिद्वादशवास्तुदेवताः पुनर्मण्डपे सिंहमिष्ट्वा गणपतिदक्षिणामूर्त्यनन्तरं 'दैत्यदर्पविनाशाये'त्यादि पुनरन्तराल आदित्यसत्यभृशान्तरीक्षानिष्ट्वा 'ओं नमो भूतेभ्यः' इति सप्तवारं दण्डबलिरित्यादि। पुनरनन्तानन्तरं स्कन्दाद्यावरणं तत्र चाम्बादीनां दण्डबलिः[२]। पुनर्न्निर्माल्यधारिण्यनन्तरं सभाद्वारि ह्लादिन्यादिचतुष्टयं बहिर्निष्क्रम्य 'ये समस्त'मित्युपस्थाय काल्याद्यावरणं[३] सुदुर्गाद्यावरणं पूर्वस्यां दिशि दुर्गाया भगवत्या 'ये गणा' इत्याद्यावरणं ततो महाबलिपीठे प्रागाद्यष्टमूर्तिबाह्येष्वष्टौ शक्तीर्विधिवद्विभाव्य तासु प्रागाद्यष्टदिग्गतासु[४] 'ये भूताः पुरस्सदः' इत्यादिमन्त्रैरेकविंशतिवारं दण्डबलिं विधायेशानदण्डबाह्ये 'ये भूता उपरिसदः' इति दण्डबलि कुर्यात्। पुनरन्तः काळ्यादिपीठिकाबलिः। उपरिपीठे ब्राह्म्यादिबलिश्च। पुनर्मन्त्रत्रयावरणं शर्वस्कन्दाद्यावरणं देवग्रहाद्यावरणं क्षेत्रपालबलिश्चेति। कौमारबलौ च देवमुपचारमूलेन सकळीकृत्य सम्पूज्य बलिमेकविंशतिवारं विधाय गण्डूषादि दत्त्वा सम्पूज्य पुष्पाञ्जलिं प्रार्थनाञ्च कृत्वा ब्रह्मणे तदीयद्वादशाक्षरेण बलिं दद्यात्। पुनर्वज्रहस्तशक्तिपाण्योः सुकुमारभद्रसेनयोर्मण्डपे मयूरस्य च बलिं दत्त्वा इन्द्रस्सुराधिपश्चैवेत्यादि तत्र विशेषः[५]। लोकेशापचितौ निजोत्सवसमुक्तैः[६] सर्वमन्त्रैरिति[७]। तदुक्तं-'दशस्वाशास्वाशाधिपपरिषदन्तेऽत्र मनुना 'ओं नमो भूताद्येन चे'ति। [८]अत्रैवं प्रयोगः। इन्द्रस्सुरपतिश्चैवेतीन्द्रमुपस्थाय तस्मै तत्पारिषदेभ्यश्च बलिं दत्त्वा 'ओं नमो भूतेभ्यः पूर्वस्यां दिशि स्कन्दस्य भगवतो ये भूताः पुरस्सदः'इत्येभिरपि, विधिवद् बलिं दत्त्वा पुनरिन्द्राग्न्योरन्तराले आदित्यसत्यभृशान्तरिक्षानिष्ट्वा तत्र 'ओं नमो भूतेभ्यः' इति सप्तवारं बलिं कुर्यादित्यादि। पुनर्मातृप्रभृतिधूर्तसेनान्तबलिं विदध्यात्। तदुक्तं-जयाबलिसमूह्यश्चात्र विशेषो विधिरिति। केचित्पूर्वस्यां दिशीत्यादिभिर्दण्डानन्तरं

१. 'र्व च' क पाठः। २. 'लिं नि' ख. च पाठः। ३. 'णं पू' च पाठः। ४. 'दिक्षु गता' क पाठः। ५. 'षाः' क पाठः। ६. 'मु' च पाठः। ७. 'ति। अथ मन्त्रैरिति। त' क पाठः। ८. 'त' ख. च पाठः।

Shripuram Publications
www.shripuram.org

प्रागादिदिक्ष्वावरणमाचरन्ति। पुनस्स[1]भायामाग्निकेतुसूर्यकेतू बहिर्निष्क्रम्य 'ये समस्त'मित्युपस्थाय ध्वजावरणं यजेत्। तत्र विशेषः एतस्मिन् परितो ध्वजेशयजन इति प्राग्देवसेनापतिं सम्पूज्य बलिं दत्त्वा तदाद्यग्निलोचनपर्यन्तान्तराळे फडन्तप्रणवप्रोक्षणादिसर्वं विधाय 'ओं नमो भूतेभ्यः' इत्यनेनैव सप्तवारं दण्डबलिं दद्यात्। एवं समन्तादपीति। पुनः षट्कोट्याद्यावरणत्रयं पुनर्महाबलिपीठबलि मन्त्रत्रयावरणं शर्वस्कन्दाद्यावरणं ग्रहावरणं क्षेत्रपालबलिश्चेति। जयाबलौ विशेषः। देवं षडक्षरेण सकळीकृत्य सम्पूज्यार्घ्यं दत्त्वा पुष्पाञ्जलिं विधाय प्रार्थ्य नन्द्यादिभ्य उत्सववद् बलिं दद्यात्। केचिद्देवायार्घ्यदानसमये मूलेन सप्तवारमीशानादिभिस्त्रिस्त्रिवारं[2] देववामदक्षिणयोः उमागङ्गाभ्यामपि बलिं विदधत इति। बहिर्द्वाःस्थयोर्व्यत्ययः, तदुक्तंसव्येऽभ्यर्च्येत्यादि। पुनरिन्द्रतत्पारिषद-बलिदानानन्तरं 'ओं नमो भूतेभ्यः' इत्यन्तराले सप्तसप्तवारं दण्डबलिनित्यादि पुनर्वाहनमनिष्ट्वा मातृप्रभृतिचण्डसेनान्तं पुनरेव मण्डपे वाहनमिति पुनस्सभायां द्वाःस्थाविष्ट्वा बहिर्निष्क्रम्य 'ये समस्त'मित्युपस्थाय ध्वजावरणा- द्यावरणत्रयमिष्ट्वा महाबलिपीठे बलिं दद्यात्। तत्र विशेषः। 'दण्डेज्याबलिपीठयोगविहिता' इति। तत्र पीठाधिपा[3]नुज्ञामवाप्य 'ये भूताः पुरस्सदः' इत्येकविंशतिवारं प्राग्दिश्यन्तरा- दिबहिरपवर्गं दण्डबलिं विकीर्य पूनर्दक्षिणतः पश्चिमत उत्तरत ऐशे चेषद्बहिर्दक्षिणतो दण्डबलिं कुर्यात्। पुनर्भूतिदादिसर्वमुत्सवोक्तवत्। मन्त्रत्रयावरणं ग्रहावरणं क्षेत्रपालबलिश्चेत्येवं जयाबलिप्रक्रियेति। "पुनःपरेद्यव्यभिपूज्य देवं मूलेन पूर्वेद्युरिवाथ देवात्। प्रसन्नतोऽनुग्रह-माददीत वृतो यदि प्राग्यजमानयुक्तः" इति पूर्वेद्युरेवेति तस्मिन्नेवाग्नावधिवासहोममात्रमेक-विप्रभोजनमप्युक्तम्। तदा सम्पाते तदग्न्युद्वासनमपि कार्यम्। तदसम्भवे यज[4]नीयदिन-सायन्तनहोमानन्तरं सम्पाते तदुद्वासनमिति ज्ञेयम्। वृतो यदि प्रागिति। कर्त्रा पूर्वं वस्त्रद्वयपवित्रसमर्पणेन वृतश्चेदेतत्सर्वं कृतवांस्तदा तेन यजमानेन सहितो देवात् प्रसन्नादनुग्रहं तत्पूजाफलरूपमाददीतेति। दक्षिणादिसर्वमर्थसिद्धमिति। इदानीं प्रकृतमनुसरामः।

ग्रामबल्यनन्तरं देवस्य स्वपनं कारयितव्यमिति, तत्प्रस्तौति-अथाप्लुत इति। तत्र मण्डप इति मुखमण्डपग्रहणम्। तदसम्भवे पूजामण्डपग्रहणम्। तस्य मार्जनालेपनाभ्यां शोधनम्। यथापुरमिति मङ्गलपालिकादिभिरित्यत्रापि संबध्यते। तदुक्तम्—'अथ सम्मृष्टलिप्तायामि'त्यादि 'शिरोपधानादियति'-त्यन्तम्। पुनः,

मङ्गलान्यष्ट परितस्तथा मङ्गलपालिकाः।

---

१. 'नः पुनस्स' ख. च पाठः। २. 'रं वा' क पाठः। ३. 'पमनुज्ञाप्य'क पाठः। ४. 'ननियतदि' क पाठः।

Shripuram Publications
www.shripuram.org

प्रदीपादींश्च विन्यस्य मण्डयेन्मण्डपोदरम्।।

इति। पुनश्चेष्टविष्टरे,

यजेत तस्मिन् यजने समाहितः स्वकीयशक्तिं निजबीजविद्यया।

इति। तत्सन्निधौ भद्रासनं निधाय तत्रापि पीठमात्रं पूजनीयम्। वक्ष्यति च- 'पीठे न्यस्य प्रथममहित' इति।।२०५।।

गर्भालयं प्रप्य समिष्टविष्टरे
देवं समास्थाप्य समर्च्य चार्चकः।

प्रसाद्य दत्त्वा व्यजनाद्युपाहृतीः
कृताञ्जलिः प्रार्थयतामनेन तम्।।२०६।।

विमर्शिनी

अथार्चकः गुरुः गर्भालयं प्राप्य समिष्टविष्टरे पूजिते पीठे देवं समास्थाप्य सम्यगावाह्य समर्च्य निवेद्य व्यजनाद्युपाहृतीः तालवृन्तादिसर्वोपहारान् दत्त्वा कृताञ्जलिर्भूत्वा 'तीर्थयात्रा त्वये'त्यनेन तं देवं प्रार्थयताम्।।२०६।।

विवरणम्

गर्भालयं प्रप्येति। तत्रास्त्रेण रक्षां विधाय गर्भालयं प्राप्नुयात्। देवं समास्थाप्येत्यावाहनमुक्तम्[१]। समर्च्य चेति। पूजानिवेदनाद्युक्तम्। प्रसाद्येति प्रसन्नपूजाव्यजनाद्युपाहृतीर्दत्त्वेति। प्रसन्नपूजासमय इति भावः।।२०६।।

तीर्थयात्रा त्वया देव! श्वः कर्तव्या सुरेश्वर!।
तत्र प्रतिसरारम्भं त्वमनुज्ञातुमर्हसि।।२०७।।

विमर्शिनी

प्रार्थनामन्त्रं पठति—तीर्थेति।।२०७।।

विवरणम्

---

१. 'नादिकमु' च पाठः।

Shripuram Publications
www.shripuram.org

अनेनेत्यभिप्रेतं मन्त्रमाह-तीर्थयात्रेति। दुर्गायां 'देवि सुरेश्वरी'ति च विशेषः।।२०७।।

अश्वत्थपत्रयुगलैरथ साग्रदूर्वा-
सिद्धार्थसंयुतघृतं परिगृह्य दोर्भ्याम्।
मन्त्रैः सुशोभनसुभद्रसुमङ्गलार्ण-
भिन्नैर्भवत्ववसितैः क्रमशोऽधिबिम्बम्।।२०८।।

आरोपयेत् कटितटावधि कन्धरान्तं
कान्तं च दोर्विनिमयोभयपार्श्वयुक्त्या।
प्रक्षालयेत् करयुगं पृथगत्र तत्त-
दश्वत्थपत्रकमपास्य च तस्य पृष्ठे।।२०९।।

विमर्शिनी

घृतारोपणमाह-अश्वत्थेति। अथ प्रार्थनानन्तरम् अश्वत्थपत्रयुगलैस्त्रिभिः साग्रदूर्वासिद्धार्थसंयुतघृतं दूर्वाग्रसिद्धार्थसंयुतं घृतं दोर्भ्यां परिगृह्य सुशोभनसुभद्रसुमङ्गलार्णभिन्नैः सुशोभनं सुभद्रं सुमङ्गलम् इत्यक्षरसंयुक्तैः भवत्ववसितैः भवतु इत्यन्ते युक्तैः 'सुशोभनं भवतु' इत्यादिभिर्मन्त्रैः अधिबिम्बं बिम्बे कटितटावधि कटिपर्यन्तं कन्धरान्तं कण्ठान्तं कान्तं मूर्धान्तं च क्रमशो दोर्विनिमयोभयपार्श्वयुक्त्या करयोर्विनिमयाद् दक्षिणकरस्य दक्षिणपार्श्वे वामकरस्य वामपार्श्वे योगश्च यथा भवति तथारोपयेत्। अत्र पृथक् तत्तदश्वत्थपत्रं तदा तदा तस्य देवस्य पृष्ठेऽपास्य करयुगं प्रक्षालयेच्च।।२०८-२०९।।

विवरणम्

घृतारोपणमाह—अश्वत्थपत्रयुगलैरिति। दोर्भ्यामश्वत्थपत्रयुगलैस्साग्रदूर्वासिद्धार्थसंयुतघृतं[१] परिगृह्याधिबिम्बं दोर्विनिमयोभयपार्श्वयुक्त्या आरोपयेत् तदश्वत्थपत्रकं पृष्ठदेशे अपास्य करयुगं प्रक्षाळयेच्चेत्येवं योजना। एकस्मिन्पात्रे षडश्वत्थपत्राणि क्षालितानि निधाय तेषु दूर्वात्रयसिद्धार्थसंयुतमाज्यं सम्भृत्यास्त्रप्रोक्षणं शोषणादिकं प्रणवपूजनञ्च कुर्यात्। पुनर्हस्ताभ्यां ते द्वे पत्रे समादाय देवस्य पादतलप्रदेशे निदध्यात्[१]। तदा

१. 'तं' च पाठः।

Shripuram Publications
www.shripuram.org

दक्षिणहस्तो दक्षिणपादसन्निधावितरः[२] इतरसन्निधौ स्यात्। ताभ्यां पादतलाद्याकटितटं 'ओं सुशोभनं भवतु' इत्यारोपयेत् तदा च दूर्वाग्रतस्तदाज्यस्य बिम्बे तथा पातोऽपीष्यते। पुनस्तत्पत्रद्वयं बिम्बपृष्ठे निरस्य हस्तद्वयं प्रक्षाळ्य द्वितीयं घृतारोपणमेवं विदध्यादिति।।२०८-२०९।।

कर्मार्चामभिषिच्य तत्र पुरतः कृत्वा विधाय द्विजैः
पुण्याहं प्रकलय्य कौतुकमधोरेणेश्वरेऽन्येषु तत्।
प्राग्वद् भूतलयादिकं लिपिमनुन्यासान्तमाधाय त-
त्पीठं मूर्तिमपि प्रकल्प्य कुसुमाराध्या समाज्ञाप्य तम्।।२१०।।

विमर्शिनी

कर्मार्चामभिषिच्य तत्र देवस्य पुरतः कृत्वा स्थापयित्वा द्विजैः सह पुण्याहं विधाय ईश्वरे अघोरेण मन्त्रेण अन्येषु प्राग्वच्च तत् क्षौमक्षिप्तसमुक्तसर्षपसुवर्णोर्ज्व-स्वलमित्युक्तं कौतुकं प्रकलय्य बद्ध्वा पुनस्तस्यां कर्मार्चायां भूतलयादिकं भूतसंहारशोषणादि भूतसृष्टिलिपिप्राणायामं च लिपिमनुन्यासान्तं लिपिन्यासं मन्त्रप्राणायामान्तं[३] न्यासं चाधाय तत्पीठं सम्पूज्य मूर्तिमपि प्रकल्प्य कुसुमाराध्या तं देवं समाज्ञाप्य प्रार्थ्यावाहयेत्।।२१०।।

विवरणम्

कर्मार्चामिति। तीर्थार्चाभिप्रायम्। तत्र पुरतः कृत्वेति। भद्रासने मूलबिम्बसम्मुखतयेति द्रष्टव्यम्। विधाय द्विजैस्सह पुण्याहमिति। 'कौतुकदेवता प्रीयान्ताम्' इति मन्त्रः। कौतुकं प्रकलय्येति। बद्ध्वेत्यर्थः। कथमित्याह-ईश्वरे अघोरेण, अन्येषु प्राग्वदिति। यथा प्रागुक्तं 'स्थित्वा प्रार्थ्य नमस्त इत्यणुयुजे'त्यादि। पुनः प्रागुक्तवद् भूतलयादिकं लिपिमनुन्यासान्तं कुर्यात्। फडन्तप्रणवेन प्रोक्ष्य जीवमात्मनि संहृत्य भूतसंहारं शोषणादिकं जीवप्रतिसङ्क्रमणं भूतसर्गं[४] लिपिन्यासं मन्त्रोदयादिपूर्वकं मन्त्राक्षराङ्गन्यासं कुर्यादित्यर्थः। तत्पीठं मूर्तिमपि प्रकल्प्येति पीठपूजापूर्वकं कर्मबिम्बे मूर्तिमन्त्रेण मूर्तिकल्पनमुक्तम्। कुसुमसंराध्या समाज्ञाप्य तमिति मूलबिम्बे पुष्पाञ्जलिपूर्वकमावाहनार्थमभ्य-नुज्ञापनमुक्तम्।।२१०।।

---

१. 'त्। द' २. 'रस' क पाठः। ३. 'न्त' ख पाठः। ४. 'र्ग' क. च पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

प्रष्ठोद्गीथोपचारैर्[१]मनुवरपुटितैः सृष्टिसंहाररीत्या
प्रोक्तैरावाहयामीत्युपरतिसहितैः पञ्चमन्त्रैस्तदीयात्।
हृत्पद्मादात्मतेजःकणमधिदरवारि प्रणीयामुतस्[२]त्तं
कर्मार्चायां सुयोज्य प्रकटयतु सहाङ्गीक्रियाद्यं च सद्यः।।२११।।

विमर्शिनी

आवाहनविधिमाह—प्रष्ठेति। प्रष्ठोद्गीथोपचारैः प्रष्ठः पुरोभागः उद्गीथः प्रणवः पुरोभागगतप्रणवोपचारयुक्तैः मनुवरपुटितैः मूलपुटितैः सृष्टिसंहाररीत्या प्रोक्तैः पूर्वं सृष्टिक्रमेण पुनः संहारक्रमेण च प्रोक्तैः आवाहयामीत्युपरतिसहितैः अवसाने आवाहयामीति सहितैः स्वीयैः[३] स्वीयैः पञ्चमन्त्रैः तदीयाद् देवस्य हृत्पद्माद् आत्मतेजःकणं परचैतन्यात्मकं तेजोलेशम् अधिदरवारि शङ्खजले प्रणीय अमुतः शङ्खात् (तं) कर्मार्चायां सुयोज्य सद्य एव सहाङ्गीक्रियाद्यं सकलीकरणाद्यं च प्रकटयतु कुर्यादित्यर्थः।।२११।।

विवरणम्

आवाहनप्रक्रियामाह—प्रष्ठोद्गीथोपचारैरिति। पञ्चमन्त्रैरित्येतस्य विशेषणमेतत्। शिवे पञ्चमन्त्राः पञ्चब्रह्माणि शेषेषु निजपञ्चतत्त्वानि। प्रष्ठावग्रगामिनावुद्गीथोपचारौ येषामिति समासः। प्रणवोपचारपूर्वकं मूलपुटितान् पञ्चमन्त्रान् सर्गक्रमेण संहारक्रमेण चोच्चरेत्। पुनरावाहयामि इति च ब्रूयात्। देवपदस्यामन्त्रणं आगच्छद्वयं देवपदस्यैव-द्वितीयान्तत्वमित्येतत् सर्वमर्थसिद्धम्। तदीयाद्धृत्पद्मादिति बिम्बहृत्कमलग्रहणम्। अधिदरवारिति। शङ्खसम्भृतजले। ततश्च प्रागेव शङ्खे जलं सम्भृत्य किञ्चित् सम्पूज्य तमञ्जलिपुटेन परिगृह्य मूलबिम्ब[४]हृदयसन्निधिं नीत्वैवं तस्मिन् आवाहयेदिति यल्लभ्यते अमुतस्तत्कर्मार्चायां सुयोज्येति शङ्खतः तज्जीवमयं वारीत्यर्थः। प्रकटयत्विति। कुर्यादिति भावः।।२११।।

तत्त्वन्यासप्रभृतिविधिना सुस्थितं मूलसंस्थं
कृत्वा देवं विहृतममुतो मण्डपान्तः प्रणीय।

---

१. 'रैर्निजमनुपु' क. ग. पाठः। २. 'स्तत् क' ख. ग. घ पाठः। ३. 'यैः प' घ. च पाठः। ४. 'म्बे' ख पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

पीठे न्यस्य प्रथममहिते स्वाणुनावाह्य भूयः
साङ्गीकृत्य प्रयजतु निवेद्यान्तिमैश्चोपहारैः ।।२१२ ।।

विमर्शिनी

मूलसंस्थं मूलार्चागतं देवं तत्त्वन्यासप्रभृतिविधिना तत्त्वन्यासादिना सुस्थितं स्थिरीभूतं कृत्वा अमुतोऽस्मात् प्रदेशाद् विहृतं कौतुकगतं देवं मण्डपान्तः प्रणीय प्रापयित्वा प्रथममहिते शय्याराधनकाल एव पूजिते कस्मिंश्चित् पीठे न्यस्य भूयः स्वाणुना स्वमूलेनावाह्य साङ्गीकृत्य निवेद्यान्तिमैरुपहारैः प्रयजतु ।।२१२ ।।

विवरणम्

तत्त्वन्यासप्रभृतिविधिनेति। हृद्येव त्रिवारं पञ्चमन्त्रन्यासमङ्गन्यासं[1] च कृत्वा रक्षां विदध्याद् इत्यर्थः। विहृतं कर्मबिम्बे नीतम्। अमुत इति गर्भगृहात्।।२१२ ।।

ताम्बूलव्यजनार्पणादिसुभगां कृत्वा प्रसन्नार्चनां
प्रागन्त्यार्घ्यविधेः स्वपञ्चमनुभिः शय्यातले शाययेत्।
व्याप्यैनं पुनरुत्क्रमेण शरतत्त्वैर्मूलतश्चादिना
जाग्रत्स्वप्नसुषुप्तिसंज्ञितदशास्तीर्त्वा तुरीयां नयेत्।।२१३ ।।

विमर्शिनी

ताम्बूलव्यजनार्पणादिसुभगां ताम्बूलार्पणादिभिर्व्यजनार्पणादिभिश्च[2] मनोहरां प्रसन्नार्चनां कृत्वा प्रागन्त्यार्घ्यविधेः अवसानीयार्घ्यदानात् पुर्वं स्वपञ्चमनुभिः स्वस्वपञ्चतत्त्वमन्त्रैः शय्यातले शाययेत्। एनं देवं पुनरुत्क्रमेण संहारमार्गेण पठितैः शरतत्त्वैः पञ्चतत्त्वैः मूलतः आदिना प्रणवेन चोत्क्रमेण पादादिकेशान्तं पृथग् व्याप्य जाग्रत्स्वप्नसुषुप्तिसंज्ञितदशाः जाग्रदवस्थां स्वप्नावस्थां सुषुप्त्यवस्थां च क्रमात् तीर्त्वा अतिक्रम्य तुरीयां दशां नयेत् प्रापयेत्।।२१३ ।।

विवरणम्

प्रागन्त्यार्घ्यविधेः कृत्वेत्यवसानीयार्घ्यग्रहणम्। तत्तु श्व एव कार्यम्। वक्ष्यति च 'अर्घ्यसमर्पणाद्य'मिति[3]। स्वपञ्चमनुभिरिति पूर्ववत्। व्याप्येति त्रिर्मन्त्रव्यापकमुक्तम्।

---

१. 'सं कृ' क पाठः। २. श्च सुभगां म' क पाठः। ३. 'त्यादि। स्व' ख. च पाठः।

www.shripuram.org Shripuram Publications www.shripuram.org

उत्क्रमेणेति संहारव्यापकमभिप्रायं पञ्चतत्त्वानां संहारक्रमाभिप्रायञ्च[1]। आदिनेति प्रणवेन। तीर्त्वेत्यतिवाह्येत्यर्थः।।२१३।।

दशां तुरीयामधिगम्य रम्यां
देवं स्वरूपानुभवानुषक्तम्।
ध्यायन् धियानन्दघनं सुरक्ष्य
संवृत्य शेषां क्षपयेत् क्षपां च।।२१४।।

विमर्शिनी

रम्यां तुरीयं दशामवस्थामधिगम्य देवं स्वरूपानुभवानुषक्तं स्वस्वरूपानुभवयोगयुक्तम् आनन्दघनं धिया ध्यायन् तं सुरक्ष्य संवृत्य यवनिकयाच्छाद्य शेषां क्षपां रात्रिं क्षपयेद् अतिवाहयेत्।।२१४।।

विवरणम्

संवृत्येति वस्त्रेणाच्छादनमुक्तम्। शेषां क्षपयेत् क्षपाञ्चेति।।२१४।।

काल्योचितं कर्म विधाय साधु
सविग्रहीभूतसमर्चितात्मा।
तारेण मूलेन च पञ्चतत्त्वैः[2]
संव्याप्य तं ध्यायतु जागरूकम्।।२१५।।

उत्थाप्य धेन्वादिकमङ्गलानि
प्रदर्श्य कृत्वार्ध्यसमर्पणाद्याम्।
प्रारब्धपूजासुसमाप्तिमिष्टे
पीठे च कृत्वा सकलीकरोतु।।२१६।।

विमर्शिनी

काल्योचितम् उषसि योग्यं सन्ध्यावन्दनादिकं कर्म विधाय साधु यथावत् सविग्रहीभूतसमर्चितात्मा सकलीकरणं शङ्खपूरणमात्माराधनं च कृत्वा तारेण मूलेन

१. 'रव्यापकक' क पाठः। २. 'मन्त्रैः सं' क पाठः।

Shripuram Publications
www.shripuram.org

पञ्चतत्त्वैश्च तं संव्याप्य सम्यक् केशादिपादान्तं व्याप्य जागरूकं जाग्रदवस्थां गतं तं ध्यायतु।।२१५।।

पुनरुत्थाप्योत्थानं कारयित्वा धेन्वादिकमङ्गलानि धेन्वादीनि शुभदर्शनयोग्यानि मङ्गलानि प्रदर्श्य अर्घ्यसमर्पणाद्यां प्रारब्धपूजासुसमाप्तिं पूर्वदिवसकृतायाः पूजायाः समाप्तिमवसानीयार्घ्यदानलयाङ्गाद्यां कृत्याथ इष्टे पीठे कृत्वा स्थापयित्वा सकलीकरोतु।।२१६।।

विवरणम्

काल्योचितमिति। गुरोरात्मनस्सन्ध्योपासनादिसर्वमुक्तम्। सविग्रहीभूतसमर्चितात्मेति स्वात्मनस्सकळीकरणाद्यात्माराधनान्तमुक्तम्। मण्डपबहिर्भागे मार्जनालेपनशुद्धस्थले[1] भद्रपीठं निधाय तत्सन्निधावुपविश्यैतत्सर्वं कार्यम्। पुनस्तस्मिन्पीठे पीठपूजा च कार्येत्यौचित्याद् अवगन्तव्यम्। यदाह-इष्टे[2] पीठेऽथ कृत्वेति। पुनर्मण्डपान्तः प्रविश्य प्रबोधनं कार्यं तदाह—तारेणेति। प्रथमं पुष्पाराधनपूर्व[3]कमञ्जलि[4]मात्रमवश्यकार्यमेव। पुनः पूर्वकृतवैलोम्येन व्यापकत्रयं विधाय प्रागवस्थं विभाव्य पञ्चमन्त्रैरुत्थाप्यार्घ्यं दत्त्वा मङ्गलानि नेत्रमन्त्रेण दर्शयेत्। धेन्वादिकानि लौकिकान्यष्टमङ्गलानि। आगमिकाष्टमङ्गलोपलक्षणमेतत्। कृत्वार्घ्यसमर्पणाद्यामिति। अवसानीयार्घ्यदानं व्यापकं लयाङ्गकरणं चोक्तम्।

प्रारब्धपूजासुसमाप्तिमिति पीठे न्यस्य प्रथममहित इत्येवं ह्य एव प्रारब्धायाः पूजायाः सुसमाप्तिमित्यर्थः, तदनुसन्धानविच्छेदार्थम् एतद्यत्नकरणमिति ज्ञेयम्। इष्टे पीठेऽथ कृत्वेत्यर्थात् तन्मण्डपबहिर्भाग इति लभ्यते। सकलीकरोत्वित्यावाहनपूर्वकमिति भावः।।२१५-२१६।।

इज्योदितानि पुनराचमनावसाना-
न्यस्मै सदन्तरसनापवनानि दत्त्वा।
गण्डूषकं बहु समर्प्य सपाद्यकाद्यं
संस्नाप्य पाद्यमथ साचमनं प्रदद्यात्।।२१७।।

विमर्शिनी

पुनरिज्योदितानि पूजापटलोक्तानि पुनराचमनावसानानि अर्घ्यादीनि पाद्यादीनि

१. 'द्धे' ख. च पाठः। २. 'ष्टपीठमथ' क पाठः। ३. 'र्वम' ४. 'पूर्वम' क पाठः।

www.shripuram.org
shripuram publications
www.shripuram.org

वा सदन्तरसनापवनानि दन्तकाष्ठजिह्वाशोधनसाधनसहितानि तान्यस्मै दत्त्वा बहु बहुशो गण्डूषकं सपाद्यकाद्यं समर्प्य संस्नाप्याथ पाद्यं साचमनं प्रदद्यात्।।२१७।।

विवरणम्

इज्योदितानीति। यदुक्तं पाद्यार्घ्याचामादिक्लृप्त्येत्यादि। पीठान्तरे पूजिते निवेश्यैतत्सर्वं कार्यम्। सदन्तरसनापवनानीति। दन्तकाष्ठमपामार्गादिकृतं मन्त्रप्रोक्षणादिसंस्कृतमुपचारेण समर्च्यास्त्रेण तेन दन्तशोधनं विधाय तत्संक्षाळ्य जह्यात्। पुनरस्त्रेण गण्डूषं दद्यात्। शलाकामयीं रसनाशोधनीं च अस्त्रप्रोक्षणसंस्कृतामुपचारेण दद्यात्। शेषं प्राग्वदिति। सपाद्यकाद्यमिति[1]। स्नानाङ्गतयेति शेषः। संस्नाप्येति कटाहादौ संस्कृतजलैरस्त्रेण प्रागभिषेक उक्तः।।२१७।।

प्रोक्ष्यापो हिपुरस्सरैर्मधुघृतेनाक्त्वा हरिद्रादिभि-
र्घृष्ट्वासिच्य शुभैर्जलैः समभिषिञ्चेन्मन्त्रतोयैरपि।
वस्त्रादीनि समर्प्य चोपहरणानि त्रीणि दूर्वाङ्कुरान्
पुष्पं चन्दनमञ्जनागरुरसौ चास्मै प्रदद्यात् क्रमात्।।२१८।।

विमर्शिनी

आपो हिपुरस्सरैः 'आपो हिष्ठा'दिभिर्मन्त्रैः प्रोक्ष्य मधुघृतेन मधुसहितघृतेन अक्त्वाभ्यज्य हरिद्रादिभिश्चूर्णैर्घृष्ट्वा शुभैर्जलैरासिच्य मन्त्रतोयैरपि 'प्राणापानव्याने'त्यादिभिः सप्तशुद्धिमन्त्रजलैः पुरुषसूक्तादिमन्त्रजलैरपि समभिषिञ्चेत्। वस्त्रादीनि त्रीणि वस्त्रोपवीतभूषणान्युपहराणानि समर्प्यास्मै दूर्वाङ्कुरान् पुष्पं चन्दनमञ्जनागरुरसौ च क्रमात् प्रदद्यात्।।२१८।।

विवरणम्

मधुघृतेनाक्त्वेति, प्रागेव लेशे पात्रविशेषे वा पूजितेनेति भावः उक्त्वेत्याभिषेकाभिप्रायम् हरिद्रादिभिर्घृष्ट्वेति मङ्गलोन्मर्दनाभिप्रायम्। आसिच्येत्यस्त्रेण संक्षाळनमुक्तम्। मन्त्रतोयैरिति मूलाङ्गसप्तशुद्ध्यादिभिरभिषेक उक्तः। त्रीणी[2](ति) वस्त्रोपवीतभूषणग्रहणम्। दूर्वाङ्कुरादीनामप्युपचारमन्त्रेणैवास्त्रप्रोक्षणादिसंस्कृतानां समर्पणं कार्यम्।।२१८।।

---

१. 'द्यमि' क पाठः। २. 'णि' क. च पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

सम्भूष्यादर्शमपि परिदर्श्यार्चयित्वा गणेशं
दत्त्वा गोभ्यो यवसमितिहासादिकं श्रावयित्वा।
विप्रेभ्यस्तण्डुलघटसुवर्णादि दत्त्वाथ देवं
प्राच्योंद्वास्य प्रकृतशयनाद्यं नयेन्मूलधाम।।२१९।।

विमर्शिनी

सम्भूष्यालङ्कृत्य आदर्शं दर्पणमपि परिदर्श्य गणेशमर्चयित्वा गोभ्यो यवसं दत्त्वा इतिहासादिकं महाभारतपुराणादीनि श्रावयित्वा विप्रेभ्यः तण्डुलघटसुवर्णादि तण्डुलपूर्णघटं सुवर्णं तिलं गवादिकं च दत्त्वाथ देवं प्राच्य प्रकृतशयनाद्यं प्रस्तुतशयनबीजाङ्कुराद्यमुद्वास्य देवं मूलधाम प्रासादं नयेत्।।२१९।।

विवरणम्

सम्भूष्येति। किरीटमकुटाद्यभिप्रायम्। आदर्शमपि परिदर्श्येति। उपचारेण दर्पणं समर्प्य नेत्रमन्त्रेण[1] तत्र देवस्य निजसुभगरूपदर्शनं कारयेदिति भावः। अथ देवं प्राच्येति विधिवत् कृत्स्ना पूजोक्ता। प्रकृतशयनाद्यमुद्वास्येति शयनीयमङ्गलाङ्कुरैरपि[2] तत्पीठोद्वासनमुक्तम्। नयेन्मूलधामेति नीराजनार्घ्यदानपूर्वकमिति भावः।।२१९।।

मूलार्चामभिषिच्य पीठमभिपूज्यात्र प्रकल्प्याणवीं
मूर्तिं तत्र सुयोज्य कौतुकगतं देवं पुरोक्ताणुभिः।
अन्वावाह्य निजेन मूलमनुना कृत्वा सहाङ्गीक्रियां
तस्मिन् साम्प्रतिकार्चनादिकविधिं कुर्वीत सर्वं ततः।।२२०।।

विमर्शिनी

पुनर्मूलार्चामभिषिच्य पीठमभिपूज्यात्राणवीं मन्त्रमयीं मूर्तिं प्रकल्प्य तत्र पुरोक्ताणुभिः पुरोक्तप्रकारेण कौतुकगतं देवं सुयोज्यान्वावाह्य स्वस्मादपि निजमन्त्रेणावाह्य सहाङ्गीक्रियां सकलीक्रियां कृत्वा सांप्रतिकार्चनादिकविधिं संप्रति योग्यं पूजादिकं च सर्वं ततः कुर्वीत।।२२०।।

विवरणम्

मूलार्चामभिषिच्येति। अन्तर्देवं प्रवेश्य मूर्तिपहस्ते कृत्वा मूलार्चामन्त्रेण[3]

---

१. 'ण तस्य तत्र दे' क पाठः। २. 'रैः तत्पी' ख. च पाठः। ३. 'स्त्रे' ख. च पाठः।

Shripuram Publications
www.shripuram.org

विधिवदभिषिञ्चेत्। पुनस्तदग्रत उपविश्य कर्मार्चां प्राग्वद्बिम्बाग्रतो निधाय उभयत्रापि पीठं सम्पूज्य मूलबिम्बे मूर्तिमन्त्रेण सम्पूज्य कर्मबिम्बे मूर्तिकल्पनपूर्वकं आवाहनादि विधाय पाद्यादि दद्यात्। पुनः प्रागावाहितरीत्या ततः कृत्स्नां देवशक्तिं शङ्खसम्भृतोदके प्रणिधाय[१] मूलबिम्बे नयेत्। पुनः पञ्चमन्त्रैर्हृदि न्यासादि सर्वं सामान्यसिद्धमेव। अन्वावाह्येति तदनन्तरं[२] स्वहृदयादावाहनमुक्तम्। साम्प्रतिकेति तदाकार्यतया प्राप्तायां[३] नित्यप्रातस्तनपूजाया ग्रहणम्। नित्यबल्यादिसद्भावे[४] तस्यादिशब्देन ग्रहणम्॥२२०॥

यात्राहोममथादधीत विनिधायाग्निं यथोक्तक्रमात्
कृत्वास्मिन् परिवारहोमचरमं सर्पिर्हुनेदेकशः।
षण्मन्त्रैश्च कनिक्रदत्प्रभृतिभिः स्वस्त्यादिपञ्चाणुभि-
श्चाथ स्वेन जुहोतु मूलमनुना द्रव्याणि चत्वार्यपि[५]॥२२१॥

विमर्शिनी

अथ यात्राहोममादधीत। कथं, यथोक्तक्रमात् स्वगृह्योक्तक्रमादग्निं विनिधायास्मिन् सामान्यन्यायेन परिवारहोमचरमं कृत्वा कनिक्रदत्प्रभृतिभिः षण्मन्त्रैः स्वस्त्यादिपञ्चाणुभिश्च एकशः एकैकशः सर्पिर्हुनेत्। अथ स्वेन मूलमनुना चत्वारि द्रव्याण्यपि जुहोतु॥२२१॥

विवरणम्

इदानीं तीर्थयात्रां वदंस्तदङ्गतया होमं तावदभिधत्ते—यात्राहोममिति। द्रव्याणि चत्वार्यपीति होमपरिसमाप्त्युपलक्षणम्॥२२१॥

गत्वा गर्भगृहं समिष्टनिजपीठे देवमास्थापितं
संस्नाप्याचमनीयकावधि समर्प्य प्रोक्ष्य चाप्यादिभिः।
चूर्णैस्तण्डुलमुद्गमाषयवहेमादिक्षपागन्धजैः
स्थाणावग्निहृदाजिते द्रुपदया शेषेपु चोद्वर्तयेत्॥२२२॥

---

१. 'णीय' ख. च पाठः। २. 'समन' ख. च पाठः। ३. 'यामिति। अत्र प्रा ४. 'वैकल्या' क पाठः। ५. 'पि॥ तीर्थार्थमत्रैव जुहोतु वाज्यं स्वैः पञ्चमन्त्रैः पृथगष्टसङ्ख्यम्। तीर्थोपकण्ठाहितपावके वा कुर्यात् ततः स्विष्टकृदादिशेषम्॥ ग' ग. घ पाठः।

www.shripuram.org
Shripuram Publications

विमर्शिनी

पुनर्गर्भगृहं गत्वा समिष्टनिजपीठे आस्थापितमावाहितं (देवं) संस्नाप्य आचमनीयकावधि पाद्यार्घ्याचमनीयानि समर्प्य च आप्यादिभिः 'आपो हि ष्ठा'दिपुण्याहमन्त्रैः प्रोक्ष्य तण्डुलमुद्गमाषयवहेमादिक्षपागन्धजैः। हेमादीत्यादिशब्देन लोहचूर्णानि गृह्यन्ते। गन्धाः स्वस्वकलशोक्ताः तैश्चूर्णैः[1] स्थाणौ अग्निहृदा अधोरास्त्रेण, अजिते द्रुपदया 'द्रुपदादिवेन्मुमुचान' इत्यनया ऋचा, शेषेषु स्वस्वमूलेन चोद्धर्तयेत्।।२२२।।

विवरणम्

देवमास्थापितमित्यावाहनाद्यभिप्रायम्। प्रोक्ष्य चाप्यादिभिरित्यब्लिङ्गादिमन्त्रै-श्चूर्णै[2]रुद्वर्तयेदिति सम्बन्धः। तण्डुलमुद्गमाषयवादयो हेमादयः क्षपागन्धश्च तद्भवैश्चूर्णैरिति तन्निर्माणोपदेशः। स्थानावग्निहृदेत्यधोरेणेत्यर्थः। अजिते द्रुपदयेति 'द्रुपदादिवेन्मुमुचान' इत्यृचेस्यर्थः। शेषेषु चेति। द्रुपदयेत्यनुषङ्गः। अत्र चूर्णनिर्माणं प्रागेव शुद्धाभिर्देवदासीभिः साधनीयम्। तदुक्तमु–

"वस्त्रदूर्वाद्यलङ्कारैरुलूखलमलङ्कतम्।
क्षाळितं तण्डुले पीठे स्थापयित्वा चतुर्मुखः।।
श्रीसूक्तविद्यया लक्ष्मीं ध्यात्वा मन्त्री तमर्चितं।
मुसलं क्षाळितञ्चापि मन्त्रितं मूलविद्यया।।
आदाय मूर्तिपैः सार्धं देशिकेन्द्रः समाहितः।
अवहत्य निशाचूर्णं निक्षिप्तं तदुलूखले।।"

इत्यादि। देवाग्रतो दर्भसंस्तरे पात्रान्तरे समुपनिधायास्त्रप्रोक्षणशोषणादि कृत्वा मुलेन सम्पूज्य तेनोद्वर्तनं कार्यम्। तदप्युक्तम्—

"निक्षिप्तचूर्णं तदनु कुम्भं संवेष्टच्य वाससा।
स्थापितं मूलमन्त्रेण गन्धादिभिरथार्चितम्।।
आदाय कुम्भं चूर्णैस्तैः श्रीसूक्तेनाभिषेचयेत्।"

इति। श्रीसूक्तग्रहणं[3] तत्तदुचितमन्त्रोपलक्षणम्। इति।।२२२।।

संस्नाप्य सम्पूज्य तथैव वा तं
कृत्वा तदग्रे शुचि कर्मबिम्बम्।

---

१. 'श्च चूर्णैः'क पाठः। २. 'तदुद्भ' च पाठः। ३. 'णं तदु' क च पाठः।

Shripuram Publications
www.shripuram.org

तीर्थेति मन्त्रेण गुहे गणेशे-
ऽप्यन्येषु कर्मेत्यणुनार्थयेत ॥२२३॥

विमर्शिनी

तं संस्नाप्य संपूज्य निवेद्य प्रसाद्य वा तथैवोद्वर्तनानन्तरमेव वा तदग्रे शुचि पूर्वच्छोधितं कर्मबिम्बं कृत्वा विन्यस्य गुहे गणेशेऽपि 'तीर्थाभिगमनादि'ति अन्येषु 'कर्मार्चा तीर्थयात्रे'ति मन्त्रेण चार्थयेत॥२२३॥

विवरणम्

संस्नाप्य सम्पूज्येति। पुनस्सम्यक् संक्षाळ्याभिषिच्य तां पूजां विधिवद्विधाय समाप्येत्यर्थः। तथैव वेति पुनस्संक्षाळनं तत्पूजाशेषपरिसमाप्तिञ्च कृत्वैवेत्यर्थः। एवमुभयथापि विकल्प उक्तः। 'कृत्वा तदग्रे शुचि कर्मबिम्बम्' इति प्राचीनमेव कर्मबिम्बमभिषिच्य पुण्याहं कृत्वा मूलबिम्बसम्मुखतया भद्रासने निधायेत्यर्थः॥२२३॥

तीर्थाभिगमनाद् यावद् देवाभिगमनं पुनः।
तावत् त्वं कौतुकमिदमधिष्ठाय प्रसीद नः॥२२४॥
कर्मार्चा तीर्थयात्रार्थं तवेयं कल्पिता विभो!
तीर्थयात्रां कुरुष्वास्यां सङ्क्रम्यानुग्रहाय नः॥२२५॥

विमर्शिनी

मन्त्रद्वयं पठति–तीर्थेति कर्मेति च॥२२४-२२५॥

सम्पातं प्रसमर्प्य मूलमनुबिम्बात् कर्मबिम्बे ततो
देवं प्रोक्तविधानतः समभिवाह्याधाय साङ्गीक्रियाम्।
मूलार्चां परिरक्ष्य कौतुकगतं देवं गृहीत्वा बहि-
र्निर्ग[1]च्छेन्निजमूर्तिपैः सह सुधीर्मङ्गल्यवा[2]दं वदन्॥२२६॥

विमर्शिनी

पुनर्यात्राहोमजं संपातं तन्मन्त्रैः प्रसमर्प्य ततो मूलबिम्बात् कर्मबिम्बे प्रोक्तविधानतः 'प्रष्ठोद्गीथोपचारैरि'त्यादिश्लोकोक्तविधानतः देवं समभिवाह्य साङ्गीक्रियामाधाय मूलार्चां

१. 'ष्कामेन्नि' २. 'दान्' क पाठः।

Shripuram Publications
www.shripuram.org
www.shripuram.org

परिरक्ष्य कौतुकगतं देवं गृहीत्वा निजमूर्तिपैः सह मङ्गल्यवादं वदन् निर्गच्छेत्। सुधीरिति मङ्गल्यवादे सावधानतोक्ता।।२२६।।

विवरणम्

सम्पातं प्रसमर्प्येति। मूलबिम्बे यात्राहोमसम्पातसमर्पणमुक्तम्। यदा प्रारब्धपूजा समाप्यते तदा पुनः पीठमिष्ट्वावाहनादि विधाय प्रार्थ्य सम्पातस्पर्शनं कार्यमिति ज्ञेयम्। प्रोक्तविधानत इति "प्रष्ठोद्गीथोपचारै"रित्याद्युदीरितरीत्यर्थः। मङ्गल्यवादं वदन् निष्कामेदित्यन्वयः।।२२६।।

जगन्निर्माणसंहारस्थित्यनुग्रहहेतवः।
देवानामीश्वरा देवा मङ्गलं प्रदिशन्तु नः।।२२७।।

विमर्शिनी

मङ्गल्यवादस्यादिश्लोकपठनेन तच्छेषमपि जप्तव्यमिति सूचयति–जगन्निर्माणेति।।२२७।।

विवरणम्

मङ्गल्यवादं यथाशक्ति वदेदित्यभिप्रायेणैकं पठति–जगन्निर्माणेति।।२२७।।

अन्तर्विकीर्य बलिमेकपरिक्रमेण
बाह्ये च तद्ध्वजचितीः प्रविलाप्य देवे।
क्षेत्रेशगुप्तसदनोऽन्यगणैः प्रयातु
देवं निजे समधिरोप्य रथादियाने।।२२८।।

विमर्शिनी

पुनरन्तर्बहिश्च एकपरिक्रमेण एकैकेन प्रदक्षिणेन तत्तद्दिशि पूर्वप्राप्तानां परिवाराणां पूर्वपूर्वक्रमयोगेन बलिं भूतबलिं विकीर्य तदा तद्ध्वजचितीश्च देवे विलाप्योद्वास्य क्षेत्रेशगुप्तसदनः क्षेत्रपालं तत्पुररक्षणार्थं तत्रैव स्थितं कल्पयित्वा अन्यगणैरन्यपरिवारैः सह देवं निजे रथादियाने। निज इत्यनेन यानस्य स्वस्ववाहनत्वकल्पनं स्वस्ववाहनमन्त्रेणाराधनं च सूचितम्। तत्र समधिरोप्य सम्यक् स्थापयित्वा प्रयातु गच्छेत्।।२२८।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

एकपरिक्रमेणेति। एकयैव प्रदक्षिणावृत्त्येत्यर्थः। यथा विष्णौ तावच्चण्डप्रचण्ड-गरुडेन्द्राग्निगणपतिदक्षिणामूर्तियममातृशास्तृनिर्ऋत्यनन्तवरुणवायुदुर्गास्कन्दसोम धनदविष्वक्सेनेशानब्रह्मसभाद्वाःस्था इति। बाह्ये चेति। एकपरिक्रमेणेत्यनुकृष्यते। कुमुदपञ्चाशद्भूतगणदेवग्रहसावान्तरद्रुतबलि[1]कुमुदाक्षपञ्चाशद्भूतगणासुरग्रहसावान्त-रद्रुतब[2]लीत्यादिक्रमो ज्ञेयः। महाबलिपीठबलिस्तु पिशाचग्रहसावान्तरद्रुत-बल्यनन्तरमविरुद्धम्। यद्वा कुमुदपञ्चाशद्भूतगणानन्तरमेतद् बलिं कृत्वैव देवग्रहसावान्तरद्रुतबल्यादिकमिति। तद्ध्वजचितीः प्रविलाप्य देव इति। कुमुदादितत्तद्ध्वजदेवताबल्यनन्तरं देवे प्रणवेन तत्तद्ध्वजोद्वासनं तदङ्गव्यापकं चोक्तम्। महाध्वजोऽपि तद्बल्यनन्तरं किञ्चित्सम्पूज्य निष्कळीकृत्य तदैव देवे वाहनतयोद्वासनीयः। क्षेत्रेशगुप्तसदन इति। प्रागेकपरिक्रमेणान्तर्बहिर्बलिविधौ तत्तत्परिषदां देवेन सह गमनं विभावनीयम्। क्षेत्रपालबलौ तु तस्य तत्रैवावस्थाय क्षेत्ररक्षणमर्थनीयमित्यभिप्रायः। केत्वीशगुप्तसदन इति वा पाठः। केत्वीशः केतुगतं गरुडादिवाहनं तदा क्षेत्रपालस्य देवस्यानुगमः। महाध्वजश्चेदानीं नोद्वासनीय इति। प्रगुप्तेति प्रशब्देन तथा भावनाविधौ तच्छेषतयास्त्रेण तालत्रयादिकञ्च सूचितम्। निजे[3] रथादियान इति फडन्तप्रणवप्रोक्षणादि सर्वं निजवाहनमन्त्रेण पूजनमपि कार्यम्।।२२८।।

द्वाःस्थादियज्वा यजमानयुक्तो
दिङ्मन्त्रतः सालबहिः परीत्य।

अर्वाग् व्रजेद् योजनतः समेतो
विप्रैर्हविष्याम्बुघटादिहस्तैः।।२२९।।

विमर्शिनी

यजमानयुक्तो महामर्यादाप्राकारगोपुरे द्वाःस्थादियज्वा द्वाःस्थाविष्ट्वा बलिं दत्त्वा बहिरपि सर्वभूतेभ्यो बलिं दत्त्वा दिङ्मन्त्रतः 'ये भूताः' इत्यादिमन्त्रेण सालबहिः प्राकारबहिर्भागे बलिं दत्त्वा परीत्य हविष्याम्बुघटादिहस्तैः बलिदानसाधनसहितैर्विप्रैः समेतो योजनतोऽर्वाग् योजनात् किञ्चिदूनमध्वानं व्रजेद् गच्छेत्।।२२९।।

---

१. 'लिं' ख पाठः। २. 'बल्यादि' ख पाठः। ३. 'ज' क पाठः।

Shripuram Publications
www.shripuram.org

विवरणम्

द्वाःस्थादियज्वेति। गोपुरद्वारि द्वाःस्थौ सूर्यचन्द्रो भवतः। आदिपदेन तद्बहिर्बलिपीठे बलहरसेनाद्युचितभूतराजपूजोक्ता। चतुर्दिक्षु गोपुरसम्भवे तेष्वप्येवं द्वाःस्थादिपूजा

स्यादिति। दिङ्मन्त्रतस्सालबहिः परीत्येति। सालशब्देन तत्तत्क्षेत्रकृतो महाप्राकारोऽभिप्रयते। तदभावे तु तत्स्थानबहिर्दिङ्मन्त्रेण पर्ययणं कार्यम्। योजनतोऽर्वाग्व्रजेदिति। नद्यातिजलाशयोद्देशेन गमनमेतदुक्तम्। यदाह-'आसाद्य नद्यादिविशिष्टतीर्थ'मिति।। २२९।।

शङ्खप्रेङ्खच्चटुलपटहोत्तालतालोरुभेरी-
रङ्गच्छृङ्गोड्डमरडमरूद्दीप्रवीणाप्रवीणाः।
ढक्काढुक्काविरलमुरलीकर्मठाश्चाभियायुः
स्फायद्दीपास्तमिह महितोद्दामहेला महेलाः।।२३०।।

विमर्शिनी

इह गमने तं देवंशङ्खप्रेङ्खच्चटुलपटहोत्तालतालोरुभेरीरङ्गच्छृङ्गोड्डमरडमरूद्दी-प्रवीणाप्रवीणाः शङ्खेन सह प्रेङ्खति शब्दायमाने चटुले समीचीने पटहे वाद्यविशेषे, उत्ताले उद्गच्छत्कालक्रियामानयुक्ते ताले च वाद्यविशेषे, उर्व्यां बृहत्यां भेर्यां च, रङ्गति शब्दविशेषं कुर्वति शृङ्गे मुखवाद्यविशेषे च, उड्डमरे शब्दायमाने च डमरौ वाद्यविशेषे च, उद्दीप्रायां प्रकाशनशीलायां वीणायां च प्रवीणाः कुशलाः ढक्काढुक्काविरलमुरली-कर्मठाश्च ढक्कायां ढुक्कायां च वाद्यविशेषयोः अविरलायामन्यूनायां[1] मुरल्यां च कर्मठाः कर्मणि कुशलाश्च स्फायद्दीपाः प्रज्वलद्दीपयुक्ताः महितोद्दामहेलाः महनीयाश्च विशृङ्खलविलासयुक्ताः महेलाः प्रौढा युवतयश्च अभियायुः अग्रे गच्छेयुः।।२३०।।

विवरणम्

यात्रायां कोलाहलं दर्शयति–शङ्खेति। शङ्खादिषु[2] प्रवीणा विदग्धाः इह तं देवमभियायुरिति सम्बन्धः। प्रेङ्खच्चटुलपटहेति वादनरयेण नानाचलनं पटुरवत्वञ्च पटहानामुक्तम्। उत्तालताळेति ताळानामुच्चैश्श्राव्यत्वमुक्तम्। उरुभेरीति। भेरिणां स्वरूपतो ध्वनितश्च महत्त्वं, रङ्गच्छृङ्गेति शृङ्गकाहळादीनां आकारतो ध्वनितश्च

१. 'यां च मु' क. च पाठः। २. 'ङ्खेषु' क पाठः।

Shripuram Publications
www.shripuram.org

शोभमानत्वमुक्तम्। उड्डमरडमर्विति क्षुद्रदुन्दुभीनां धृष्टस्फुटध्वनियोगः। उद्दीप्रवीणेति वीणाभेदानामुज्ज्वलस्वरशालित्वं, ढक्कादिषु कर्मठाः, अविरळमुरळीति वंशीनां भूयस्त्वमभिन्नमिति स्वरशालित्वञ्चोक्तम्। स्फायद्दीपा इति। चकाराध्याहारः। दीपानां स्फीतत्वमुज्ज्वलत्वं महाप्रकाशत्वञ्च। महितोद्दामहेलाः महेळा इति। हेलाः नानाविधाः क्रीडाः ताश्च यौधानां कृत्रिमरथतुरगादिविज्ञानविदां नर्तकादीनाञ्च सम्भवति। तासां गुणातिशयतो महनीयत्वमनर्घत्वं च महितोद्दामेति विशेषणाभ्यामुक्तम्। तासु महेळास्समर्थाश्चेत्यभियायुरिति सम्बन्धः।।२३०।।

पञ्चवाद्यवरवादनाविधाचुञ्चवोऽस्य पुरतः प्रयान्त्विह।
छत्रचामरविधारिणोऽभितः पृष्ठतो जयजयादिवादिनः।।२३१।।

विमर्शिनी

इहैव गमने पञ्चवाद्यवरवादनाविधाचुञ्चवः तेषां विशिष्टवाद्यानां वादनाविधायां प्रयोगे चुञ्चवः प्रसिद्धाः अस्य देवस्य पुरतः प्रयान्तु। छत्रचामरविधारिणः छत्राणि चामरादीनि च विशेषेण धारिणः अभितः पार्श्वयोश्च जयजयादिवादिनः स्तुतिपाठकाश्च पृष्ठतश्च प्रयान्तु।।२३१।।

विवरणम्

विधाचुञ्चव इति। 'तेनवित्तश्चुञ्चुप्चणपौ' इति तया लोके प्रथिता इत्यर्थः। अस्येति देवग्रहणम्।।२३१।।

आसाद्य नद्यादिविशिष्टतीर्थं तत्सम्मुखं न्यस्य समिष्टपीठे।
साङ्गीक्रियाद्यं प्रविधाय तस्मै दद्याद् द्वितीयाचमनावसानम्।।२३२।।

विमर्शिनी

पुनर्नद्यादिविशिष्टतीर्थं नदीनदादिप्रसिद्धतीर्थं पुण्यजलस्थानमासाद्य तत्समीपे समिष्टपीठे तत्सम्मुखं तीर्थाभिमुखं यथा तथा न्यस्य साङ्गीक्रियाद्यं प्रविधाय तस्मै देवाय द्वितीयाचमनावसानमुपहरणं दद्यात्।।२३२।।

Shripuram Publications
www.shripuram.org

विवरणम्

नद्यातिविशिष्टतीर्थमिति। तत्र प्रपां मण्डपिकां वा तत्सम्मुखतया विधाय मार्जनालेपशोधिते तदन्तर्भागे भद्रपीठं विन्यस्य तत्र पीठं सम्पूज्य तस्मिन् देवं तत्सम्मुखतयैव विधाय विश्रमार्ध्यमपि दद्यादिति। साङ्गीक्रियाद्यमिति मूलेनावाहनादिकमुक्तम्।।२३२।।

विशोधिते तीर्थजले जलेशादीज्यातदर्हाहुतिजाज्यसिद्धे।
त्रिर्मज्जयेत् तज्जलसम्मुखीनं देवं सुधिः स्वैरथ पञ्चमन्त्रैः।।२३३।।

धारणादिभिर्विशोधिते जलेशादीज्यातदर्हाहुतिजाज्यसिद्धे तीर्थं वरुणदेवं च पृथक् पृथगावाह्य पूजिते तद्योग्यपञ्चतत्त्वमन्त्रादिहुतसंपातसंस्पृष्टे च तीर्थजले तज्जलसम्मुखीनां तज्जलाभिमुखीकृतं देवमथ स्वैः स्वैः पञ्चमन्त्रैः सुधीस्तज्जलैर्देवस्याप्यायनं स्मरन् त्रिः त्रिवारं मज्जयेत्।।२३३।।

विवरणम्

विशोधिते तीर्थजल इत्यस्त्रप्रोक्षणं रक्षाशोषणादिकमुक्तम्। जलेशादीज्येति। वरुणपूजा तीर्थशक्तिमयगङ्गापूजा मूलपूजा चोक्ता। तदर्हाहुतिजाज्येति तीर्थहोमसम्पातग्रहणं ताभ्यामिज्ययाज्येन च सिद्धे संस्कृते।।२३३।।

पीठेऽत्रैव निधाय देवमुपचर्याचामनिष्ठं क्रमा-
न्मन्त्री तन्मनुभिः प्रमार्ज्य महितैश्चूर्णैः समुद्वर्त्य च।
नाभीदग्धजले स्थितोऽसुयमनं कुर्वन्नृतं चादिभि-
र्मन्त्रैस्तत्र कृताघमर्षणविधिस्तीर्थे पुनः स्नापयेत्।।२३४।।

विमर्शिनी

अत्रैव पूर्वपीठ एव निधाय आचामनिष्ठं पाद्यार्ध्याचमनान्युपचर्य मन्त्री 'आपो हि ष्ठा'दिमन्त्रज्ञः तन्मनुभिः प्रोक्षणमन्त्रैः क्रमात् प्रमार्ज्य अभ्युक्ष्य महितैः पूजितैः हेमनिशादिभिश्चूर्णैः समुद्वर्त्य नाभीदघ्नजले नाभिप्रमाणजले स्थितो भूत्वा 'ऋतं च सत्यं चा'दिभिर्मन्त्रैः असुयमनं प्राणायामं कुर्वन् कृताघमर्षणविधिः कृताघमर्षणकर्मा तत्र तीर्थे पुनरपि स्नापयेत्।।२३४।।

Shripuram Publications
www.shripuram.org

विवरणम्

आचामनिष्ठैरिति। यथा स्वमर्घ्यपाद्याचमनीयग्रहणम्। तन्मनुभिः प्रमार्ज्येति मार्जनोचितमन्त्रग्रहणम्। यदुक्तं–

'जलेष्वावाह्य गङ्गाद्याः सरितस्ताः सभाजयेत्।'

इत्यादि। तथा–

'प्रोक्षयेत् कुशपाणिस्तु मूर्तिपैः सहितो गुरुः।
सुरभिमत्यब्लिङ्गाभिर्वारुणीभिश्च मन्त्रवित्।।
ततो हिरण्यवर्णाभिः पावमानीभिरेव च।
व्याहृतीभिश्शान्तिकैश्च षण्मन्त्रैर्मूलमन्त्रतः।।'

इति। मन्त्रीति महितैश्चूर्णैस्समुद्वर्त्य चेति प्रागुक्तविधिनैवेति भावः। नाभीदघ्नजले स्थित इति। तस्मिन् तीर्थे[१] देवं गृहीत्वा नाभ्यन्तमवतीर्य तत्रावतिष्ठमान इत्यर्थः। ऋतञ्चादिभिर्मन्त्रैरसुयमनं कुर्वन्निति तत्रार्धनिमग्नकायस्सन्निति सम्प्रदायः. मन्त्रीत्यनुकृष्यते मन्त्रार्थप्रतिपत्तिसमर्थ इति। व्यष्ट्यात्मनो देवस्य प्रणवमन्त्रेणैव[२] परचिद्रूपे स्वरूपे संहारं पुनः 'ऋतञ्च सत्यञ्चे'ति सूक्तं त्रिवारं जपंस्ततः स्वरूपादभीद्धतपोवस्थादृतसत्याद्युत्पत्तिक्रमेण समष्टिरूपेण वैराजरूपपर्यन्तयापि जापं त्रिवारमनुसन्दध्यादिति च तदाशयः। तत्र कृताघमर्षणविधिरिति। एतदेवानुसन्धानम् अघमर्षणमिति स्वात्मनोऽप्येवं देवाभेदानुसन्धानेनाघमर्षणसिद्धिः। तदा सहस्नानं विदधतामप्येवं अघमर्षणादिर्भवति। तदुक्तं–

'देवेन सह तत्काले निमज्जन्ति च ये नराः।
ते निर्धूयाशुभं सर्वं महापातकमप्यथ।।
यान्ति ध्रुवं सुदुष्प्रापं स्थानमाचन्द्रतारकम्।'

इति। तीर्थे पुनः स्नापयेति त्रिवारमृतञ्चेत्यादि सूक्त[३]जपसमनन्तरमेव त्रिवारं प्रणवेन मूलेन वा मज्जनमुक्तम्।।२३४।।

पीठे निवेश्य वसनाद्यमथोपहृत्य
देवं समर्च्य विनिवेद्य निवेद्यमग्नौ।

---

१. 'र्थ इति व्याष्टद्या' च पाठः। २. 'मात्रेणै' घ पाठः। ३. 'क्तग्रहणम्' क पाठः।

shripuram publications
www.shripuram.org

हुत्वोक्तवद्[1] बलिमपि प्रविकीर्य पूजा-
शेषं समाप्य मनुनेति निवेदयेच्च।।२३५।।

विमर्शिनी

अथ पीठे[2] पुनरपि निवेश्य वसनाद्यं वस्त्रोपवीताद्यमुपहृत्य देवं समर्च्य निवेद्यं विनिवेद्य अग्नौ हुत्वा पूजाहोमं विधाय उक्तवत् तीर्थे बलिमपि प्रविकीर्य पूजाशेषं समाप्य इति वक्ष्यमाणमनुना निवेदयेच्च।।२३५।।

विवरणम्

पीठे निवेश्येति। पुनरुन्मज्ज नीत्वा पीठे प्राग्वन्निवेशयेत्। वसनाद्यमित्यङ्ग-वस्त्रादिग्रहणम्। अग्नौ हुत्वेति पूजाङ्गतया होम उक्तः।

उक्तवदिति। यथा प्रासादेऽस्य पूजायां होमो बलिश्चैवमिहापि कार्यमिति भावः। इति मनुना निवेदयेच्चेति। अनेन मन्त्रेणेत्यर्थः।।२३५।।

तीर्थेऽस्मिन् पावने पुण्ये स्नातोऽसि पुरुषोत्तम!।
अतस्त्वमनुगृह्णीष्व स्वस्थानोपाश्रयेण नः।।२६६।।

विमर्शिनि

तन्मनुं पठति–तीर्थेऽस्मिन्निति।।२६६।।

विवरणम्

तन्मनुं पठति–तीर्थेस्मिन्निति।।२६६।।

हरिविषये मनुरेवं परेषु परमेश्वरादिपदमत्र।
पुरुषोत्तमपदविषये कुर्यात् स्वस्वोचितं मन्त्री।।२३७।।

विमर्शिनी

हरिविषये विष्णौ एवं मनुः। परेषु देवेषु अत्र पुरुषोत्तमपदविषये पुरुषोत्तमशब्दस्थाने मन्त्री मन्त्रपदयोजने कुशलः स्वस्वोचितं स्वस्वयोग्यं परमेश्वरादिपदं कुर्याद् योजयेत्।।२३७।।

---

१. 'त्वामितो ब' ख पाठः। २. 'ठे नि' ख. ग. ङ. च पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

मन्त्रीति। दुर्गायां परमेश्वरीत्याद्यभिप्रायम्॥२३७॥

उद्वास्य तीर्थं निजवाहने त-
मारोप्य मूलालयमागमय्य।
तस्मिन्नहन्येव नियोज्य[1] मूल-
बिम्बेऽभिषिच्य प्रयजेच्च देवम्॥२३८॥

विमर्शिनी

ततस्तीर्थमुद्वास्य तं देवं निजवाहने पूर्ववदारोप्य मूलालयमागमय्य तस्मिन्नहन्येव मूलबिम्बे नियोज्याभिषिच्य देवं यथावत् प्रयजेच्च॥२३८॥

विवरणम्

उद्वास्य तीर्थमिति। प्रणवेन किञ्चिदिष्ट्वा सर्वमेकीकृत्य तेनैव देवमुद्वासयेत। तस्मिन्नहन्येव। एवं मूलालयमागमय्य मूलबिम्बे नियोज्येत्यन्वयः। हेत्वन्तरेण रात्रावेवागमनादिसंभवे प्रायश्चित्तं स्यादित्यर्थात्सूचितम्। द्रुततरं स्वालयप्रापणं कार्यमित्यप्युक्तम्। तदा च बहिरन्तश्च प्रदक्षिणसमये प्रागनुगतानां परिषदां यथास्थान-मवस्थानमपि भावनीयमित्यर्थादवबोद्धव्यम्। अभिषिच्येति संस्नाप्य सम्पूज्येत्येवमभ्युपगमे गर्भगृहं प्रापय्य मूलबिम्बमभिषिच्य प्रागुक्तरीत्या कर्मबिम्बान्मूलबिम्बे देवमुद्वासयेत्। तथैव वेत्येवमभ्युपगमेऽपि गर्भालयं प्रापय्य मूलबिम्बं प्रागसंक्षाळितं तच्चूर्णपरित्याग-पूर्वमभिषिच्योद्वासयेत्। पुनः प्रयजेच्च। तथैव वेत्यत्र तदनन्तरमङ्गवस्त्रादिसमर्पणक्रमेण तत्प्रारब्धपूजापरिसमापनमेव कार्यमिति। ध्वजे रक्षार्थं कल्पिते च तस्य शङ्खेन प्रासादान्तर्वाहनसमुद्वासनमपि कार्यम्॥२३८॥

तस्मिन् परस्मिन्नथवाह्नि देवं समुक्तनीत्या कलशैः प्रभूतैः।
संस्नाप्य यात्रोदितदोषशान्त्यै समर्चयेद् भूतबलिं किरेच्च॥२३९॥

---

१. 'सु'।

Shripuram Publications
www.shripuram.org

विमर्शिनी

तस्मिन् परस्मिन् वा अह्नि तद्दिने उत्तरदिवसे वा समुक्तनीत्या कलशपटलोक्तरीत्या प्रभूतैर्बहुभिः कलशैर्देवं यात्रोदितदोषशान्त्यै स्वस्थानाद् दूरगमनदोषशान्त्यै संस्नाप्य समर्चयेत्। भूतबलिं च [1]किरेत्।।२३९।।

इति तन्त्रसमुच्चये ध्वजेज्या-
बलिसंवेशनतैर्थिकक्रियाढ्यः।

नवमोऽनवमार्थदायिदेवो-
त्सववादी पटलः प्रगुम्फितोऽभूत्।।२४०।।

विमर्शिनी

पटलमुपसंहरति–इतीति। तन्त्रसमुच्चये ग्रन्थे नवमः पटलः प्रगुम्फितो बद्धोऽभूत्। कथंभूतः, अनवमार्थदायिदेवोत्सववादी अनवमानुत्कृष्टानर्थान् धर्मादिपुरुषार्थान् (दायिनः) दानशीलस्योत्सवस्य वादी। कथंभूतः पुनरुत्सवपरिकरः, ध्वजेज्याबलिसंवेशनतैर्थिक-क्रियाढ्यः ध्वजेज्यया ध्वजस्थापन[2]पूजया, बलिना भूतबलिनोत्सवबलिना च, संवेशनेन स्वापनेन च, तैर्थिकक्रियया तीर्थस्नानक्रियया च आढ्यः परिपूर्णः।।२४०।।

इति तन्त्रसमुच्चयविमर्शिन्यां नवमः पटलः।

विवरणम्

भूतबलिं किरेच्चेति तदा प्रागादिभूतानां विसर्जनमपि भावनीयमिति।।२४०।।

इति तन्त्रसमुच्चयविवरणे
नवमः पटलः।।

१. 'कुर्यात्।।' क पाठः। २. 'जनादिमिः ब' क. घ पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org